पञ्जीकरणसंख्या डी०ई०एल०एस०ए०एन० २००२/८९२१ आई०एस०एस०एन०—२२७८-८३६०

**मूल्यम्— २५ रूप्यकाणि**

# संस्कृत-मञ्जरी

# SANSKRIT-MANJARI

**अन्ताराष्ट्रिया मूल्याङ्किता त्रैमासिकी शोधपत्रिका**

**An International Referred Quarterly Research Journal**

**वर्षम् ११ अङ्कः ४**

**( अप्रैल २०१३ तः जून २०१३ पर्यन्तम् )**

**प्रकाशकः**

**दिल्ली संस्कृत अकादमी**

**( दिल्लीसर्वकारः )**

**DELHI SANSKRIT ACADEMY**

**(Govt. of N.C.T. of Delhi)**

**प्रकाशकः**
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५
दूरभाषः—०११-२३६३५५९२, २३६८१८३५, २३५५५६७६

**सदस्यताशुल्कम्**

| | | | |
|---|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, | $ 1 |
| वार्षिकम् | : | 100 रूप्यकाणि, | $ 4 |
| त्रैवार्षिकम् | : | 300 रूप्यकाणि, | $ 12 |
| पञ्चवार्षिकम् | : | 500 रूप्यकाणि, | $ 20 |

ISSN—2278-8360

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः
बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिऑर्डर) अथवा सी०टी०सी० चैक माध्यमेन
**( सचिवदिल्लीसंस्कृतअकादमी**पक्षे **)**
Mode of payment
Demand Draft, Money order or by CTC Cheque
(In favour of Secretary, Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com
Website : www.delhisanskritacademy.com

**मुद्रकः**
**मै० डालफिनप्रिण्टोग्राफिक्सः**
4ई/7, पाबला-बिल्डिंगः, झण्डेवालानविस्तारः,
नवदेहली-११०००५
दूरभाषः—०११-२३५९३५४१, २३५९३५४२

संरक्षका:
**श्रीमत्य: शीलादीक्षितमहोदया:** (देहल्या: माननीया: मुख्यमन्त्रिवर्या:)
**श्रीमत्य: प्रो० किरणवालियामहोदया:** (देहल्या: माननीया: शिक्षाभाषामन्त्रिवर्या:)

परामर्शदा:
**प्रो० शशिप्रभाकुमारवर्या:** (जवाहरलालनेहरूविश्वविद्यालयस्य आचार्या: दिल्लीसंस्कृताकादम्या उपाध्यक्षाश्च)
**प्रो० राधवल्लभत्रिपाठिवर्या:** (राष्ट्रिय-संस्कृत-संस्थानस्य कुलपतय:)
**प्रो० वीरेन्द्रकुमार-अलङ्कारवर्या:** (अध्यक्षा:, संस्कृतविभाग:, पंजाबविश्वविद्यालय:, चण्डीगढम्)
**प्रो० भीमसिंहमहोदया:** (आचार्या:, कुरुक्षेत्रविश्वविद्यालय:)
**प्रो० रूपकिशोरमहोदया:** (सचिव:, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जैनम्)
**प्रो० मिथिलेशचतुर्वेदिमहोदया:** (आचार्या: अध्यक्षाश्च संस्कृतविभाग: दिल्लीविश्वविद्यालय:)

लेखपर्यवेक्षका:
**प्रो० महावीरमहोदया:** (कुलपतय:, उत्तराखण्डसंस्कृतविश्वविद्यालय:, हरिद्वारम्)
**डॉ० विजयकुमारकर्ण:** (संस्कृतविभागाध्यक्ष:, विद्यान्तहिन्दूपरास्नातकमहाविद्यालय: ल०वि०वि०, लखनऊ)

प्रधानसम्पादक:
**डॉ० धर्मेन्द्रकुमार:**

सहायकसम्पादक:
**प्रद्युम्नचन्द्र:**

---

**कस्यापि विवादस्य कृते न्यायस्थलं राष्ट्रियराजधानीक्षेत्रम्, देहली भविष्यति।**

# सम्पादकीयम्

दिल्ली-संस्कृत-अकादम्या प्रकाश्यमानाया अन्ताराष्ट्रियमूल्याङ्किताया: 'संस्कृत-मञ्जरी'-समाख्याया: 'त्रैमासिक्या:-शोधपत्रिकाया:' प्रस्तुतमङ्कं सम्पादयन्नितरां प्रसीदति मे चेत:।

अयि भो! विश्ववाङ्मयेषु संस्कृतं श्रेष्ठरत्नम् इति न केवलं भारते अपितु समग्रविश्वे एतद्विषये निर्णयकर्तृभि: जनै: स्वीकृतम्। व्याकरण-ध्वनिशास्त्र-दृष्ट्या विश्वस्य कापि भाषा संस्कृतभाषावत् उन्नता नास्ति। संस्कृतभाषाया: प्राचीना: अत्युच्चकोटिकाश्च रचना: स्वीये गुणे, शक्तिशालिनि मौलिकत्वे, सौन्दर्ये, सारतत्त्वे, वाक्तत्त्वस्य वैभवे, औदात्त्ये, वैशाल्ये च विश्वस्य समस्तवाङ्मये अग्रपङ्क्तौ विराजन्ते। इयं हि भाषा युगपद् भव्या, मधुरा, नमनीया, ओजस्विनी, सुनिष्पन्ना, समृद्धा, प्राणस्पर्शिनी सूक्ष्मा च। संस्कृतभाषां विहाय अन्या काऽपि भाषा विश्वमञ्चे भारतीयसंस्कृते: सभ्यतायाश्च यथायोग्यं प्रतिनिधित्वं कर्त्तुं नार्हति। यदि कोऽपि अस्मान् पृच्छेत्-आंग्लदेशस्य भाषा आंग्ल, जापानदेशस्य भाषा 'जैपनीज्' इति, एवं भारतस्य भाषा का? का वा सा भाषा या भारतीयताया: परिचायिका? तदा अस्माकम् उत्तरं किं स्यात्? वस्तुत: संस्कृतभाषा एव भारतीयताया: परिचायिका, एषैव भाषा अद्यापि भारतस्य गौरवं सर्वत्र आवहति। अद्य हि अस्माकं राष्ट्रस्य स्थिति: न पूर्ववत् सम्मुन्नता। नूनं नैतिकपतनमेवैतस्य कारणम्। परित्यक्तानि अस्माभि: नैतिकमूल्यानि। समाजे सर्वत्र व्याप्ता: भ्रष्टाचार-दुराचार-आतङ्कवादा: भारतस्य गौरवं दिनानुदिनम् अधोनयन्ति। जातिवाद-प्रान्तवाद-भाषावाद-सदृश-बहुविधवादै: अवसादङ्गता भारतमाता। एतादृशे सङ्कटमये काले संस्कृतिसंस्कारसमुन्नायिका जीवनमूल्योपदेशिका संस्कृतभाषैव आशाया: केन्द्रस्थानम्। अनयैव भाषया भारतस्य पुनरुत्थानं शक्यम्।

अस्माकं देशे जायमानाया: जातिगत-असमानताया: भेदभावस्य च निवारणमपि संस्कृतभाषाया: शिक्षणेन एव भवितुं शक्यते। अस्मिन् प्रसङ्गे स्वामिविवेकानन्दवर्याणां वचांसि उल्लेख-योग्यानि The only safety, tell you men who belong to the lower castes, the only way to raise your condition is to study sanskrit.[1]

संस्कृतभाषाया एतादृशं माहात्म्यमवलोक्यैव दिल्लीसर्वकारेण दिल्ली-संस्कृत-अकादम्या: स्थापना विहिता। अकादमीयं निजस्थापनाकालादेव गीर्वाणवाण्या: नैकविध-प्रचारे प्रसारे च संलग्ना। अयि संस्कृतसमाराधका: सहृदयपाठका:! सुविदितमेवेदं तत्र भवतां भवतीनाञ्च यद् दिल्ली-संस्कृत-अकादमी प्रतिवर्षं संस्कृतानुरागिणां कृते विविधान् कार्यक्रमान् आयोजयति। बहूनां दुर्लभसंस्कृतग्रन्थानां प्रकाशनं विदधाति अथ च संस्कृताध्येतॄणां विद्यालय-महाविद्यालय-स्तरीय-छात्राणां कृते बह्व्य: प्रतियोगिता: समायोजयति। अन्ताराष्ट्रियमूल्याङ्किताया: संस्कृतमञ्जरी-नामधेयाया: शोधपत्रिकाया: प्रकाशनमपि अकादम्या महत्त्वपूर्णं प्रकल्पम्।

२०१२ तमे वर्षे मईमासे अशेषशक्तिसम्पन्नस्य परमेशस्य परमानुकम्पया मया अकादम्या: सचिवरूपेण संस्कृत-सेवाया: सौभाग्यम् अवाप्तम्। ममागमनानन्तरम् २०१२-२०१३ तमे वर्षे

1. The Vedanta Keshari, Sri Ramakrishna Math, Mylapore, Madras May 1962, P.16

अकादम्या आयोजितानि विविधायोजनानि अत्र समासतो उल्लिख्यन्ते।

**विद्यालय/महाविद्यालयस्तरीयप्रतियोगिताः—**

अस्मिन् वर्षे समायोजितासु विद्यालय/महाविद्यालयस्तरीय-श्लोक-संगीत-वादविवाद-सद्योभाषण-सद्यःपद्यरचना-शलाकादिप्रतियोगितासु दिल्लीप्रदेशस्य दशसहस्रतोऽपि (१०,०००) अधिकैः विद्यार्थिभिः भागः गृहीतः।

**प्रतिभापुरस्कारवितरणम्—**

अस्मिन् समारोहे संस्कृतविषये प्रतिभासम्पन्नेभ्यः सहस्राधिकेभ्यः (१०००) विद्यार्थिभ्यः '**संस्कृतप्रतिभा**' इति पुरस्काराः प्रदत्ताः।

**प्रकाशनकार्यम्—**

अकादम्या सञ्चालितेषु प्रकल्पेषु प्रकाशनमपि अतिमहत्त्वपूर्णम्। अस्मिन् वर्षे अकादम्या अधोलिखितग्रन्थानां प्रकाशनं विहितम्—

१. ऋग्वेदसंहिता
२. यजुर्वेदसंहिता
३. सामवेदसंहिता
४. अथर्ववेदसंहिता
५. वेदमञ्जरी
६. निरुक्तसम्मर्शः
७. व्याकरणमञ्जरी
८. श्रीमद्भगवद्गीता (समर्पणभाष्ययुता)
९. कथानिर्झरी
१०. नाट्यनिर्झरी
११. संस्कृतचन्द्रिका (मासिकी बालपत्रिका)

**संगोष्ठ्यः सम्मेलनानि च—**

संगोष्ठीसम्मेलनदृष्ट्या तु वत्सरमिदं विशेषेणोल्लेख्यम्, यतो ह्यस्मिन् वर्षे अकादम्या नैकसंगोष्ठीनां सम्मेलनानाञ्च आयोजनं विहितम्। २०१२ तमे वर्षे सितम्बरमासे जवाहरलाल-नेहरूविश्वविद्यालये द्विदिवसीया राष्ट्रिया वैदिकसंगोष्ठी समायोजिता। संगोष्ठ्यां समागतैः विद्वद्भिः वेदे वर्णितेषु विविधविषयेषु चर्चा विहिता। अस्यैव मासस्यान्ते गुरुकुलगौतमनगरे राष्ट्रिया संगोष्ठी समायोजिता। अस्यां वर्त्तमानसमये गुरुकुलशिक्षाप्रणाल्याः प्रासङ्गिकताविषये चर्चा विहिता। समारोहेऽस्मिन् भारतवर्षस्य समस्तगुरुकुलानाम् आचार्याः अन्ये संस्कृतविद्वांसश्च समागताः। अस्मिन्नेव वर्षे अक्तूबरमासे दिल्ली-संस्कृत-अकादम्याः वैदिक-मिशन इत्येतयोः संयुक्ततत्त्वावधाने मुम्बईमहानगरे वैदिक-संगोष्ठ्या आयोजनं विहितम्। अस्यां हि संगोष्ठ्यां समस्तादपि भारतात् समागतैः वैदिकवाङ्मयविचक्षणैः गाम्भीर्ययुक्ताः शोधलेखाः पठिताः। संगोष्ठ्याः समापनसमारोहे मुख्यातिथित्वेन समागतानां मुम्बईमहानगरस्य पुलिसायुक्तमहोदयानाम् उद्बोधनमतीवोत्प्रेरकमासीत्। तैः कथितम् ''यत् देहल्याः अकादमी मुम्बईनगरे सङ्गोष्ठीम् आयोजयति इति तु ऐतिहासिकमभूतपूर्वञ्च।''

एवमेव उत्तराखण्डराज्यस्य राजधान्यां देहरादूननगरे अस्माभिः त्रिदिवसीया शास्त्रीय-संगोष्ठी आयोजिता। एतस्य कार्यक्रमस्य समापनसमारोहे उत्तराखण्डराज्यस्य महामहिम-राज्यपालमहोदयैः अकादम्याः प्रयासस्य भूरिशः प्रशंसा विहिता कथितञ्च ''यत् तेऽपि

संस्कृतभाषायाः यथासामर्थ्यं प्रचारं विधास्यन्ति'' इति। तेषाम् उद्बोधने तेषां संस्कृतानुरागः स्पष्टं प्रतीयते स्म।

अस्मिन्नेव वर्षे जूनमासे नोएडानगरस्थ-एमिटिविश्वविद्यालये अकादम्या त्रिदिवसीयम् अखिलभारतीयनवोदितसंस्कृतविद्वत्सम्मेलनं समायोजितम्। सम्मेलनेऽस्मिन् षट्शताधिकैः (६००) शोधच्छात्रैः स्वीयानि शोधपत्राणि प्रस्तुतानि। एतस्य कार्यक्रमस्य वैशिष्ट्यमिदं ''यत् एमिटिविश्व-विद्यालयस्य संस्थापककुलपतिभिः अशोककुमारचौहानमहोदयैः अकादम्याः संस्तुत्यनुसारम् एमिटिपरिसरे संस्कृताध्ययनकेन्द्रस्य प्रारम्भो भविष्यति, यस्मिन् संस्कृतविषये स्नातक/स्नातकोत्तर-स्तरीयाः (बी०ए०/एम०ए०) कक्षाः प्रचलिष्यन्ति इति उद्घोषितम्।''

साम्प्रतञ्च अगस्तमासे २३,२४,२५ दिनाङ्के विज्ञानभवने अन्ताराष्ट्रिय-संस्कृत-सम्मेलनम् अस्माभिः समायोज्यते। अस्मिन् सम्मेलने भारतवर्षस्य समस्तविश्वविद्यालयेभ्यः संस्कृतविभाग-स्याचार्याः, उपाचार्याः सहायकाचार्याश्च समागच्छन्ति इति सूचनं हर्षप्रदम्। न केवलं भारतवर्षात् अपितु भारतेतर-नेपाल-नीदरलैण्डादिदेशेभ्योऽपि संस्कृतविद्वांसः समागच्छन्ति।

**संस्कृतशोधसन्दर्भपुस्तकालयनिर्माणम्—**

अस्मिन्नेव वर्षे दिल्ली-संस्कृत-अकादम्याः परिसरे संस्कृतशोधसन्दर्भपुस्तकालयनिर्माणस्य योजनाऽपि दिल्लीसर्वकारेण स्वीकृता। पुस्तकालयशिलान्याससमारोहे माननीयाः मुख्यमन्त्रिवर्याः आयान्ति इति तु उत्साहजनकम्। पुस्तकालयेऽस्मिन् विशेषेण संस्कृतस्य पाण्डुलिपीनां संग्रहः करिष्यते। संस्कृतानुरागिणां कृते समग्रसंस्कृतवाङ्मयस्य संग्रहोऽपि करिष्यते। पुस्तकालयस्योपरि विशालसंगोष्ठीभवनस्यापि निर्माणं करिष्यते। पुस्तकालयनिर्माणकार्यं तु दिल्ली-संस्कृत-अकादम्याः कृते महत्त्वपूर्णा उपलब्धिः।

अकादम्यां सचिवरूपेण समागमनानन्तरं ममायमेव प्रयासः यत् संस्कृतभाषायाः प्रसारः कथमधिकाधिकतया भवेदिति। कार्येऽस्मिन् दिल्ली-सर्वकारस्य माननीयाः मुख्यमन्त्रिवर्याः श्रीमत्यः शीलादीक्षितमहोदयाः, माननीयाः शिक्षामन्त्रिमहोदयाः प्रो० किरणवालियामहोदयाश्च पूर्णरूपेण सहयोगं कुर्वन्ति इति ताभ्यः धन्यवादान् विनिवेद्य विरमामि।

—निवेदकः

**डॉ० धर्मेन्द्रकुमारः**

सचिवः

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | | | **पृष्ठसंख्या** |
| | सम्पादकीयम् | | **iv** |
| १. | पुरुषार्थचतुष्टयम् | *—पं० रामनारायण: शास्त्री* | १ |
| २. | वैदिकसाहित्येऽलङ्कारतत्त्वमीमांसा | *—डॉ० श्यामसुन्दरठाकुर:* | ५ |
| ३. | वैदिकवाङ्मये लोकप्रबन्धनम् | *—डॉ.जीतराम भट्ट:* | ७ |
| ४. | अष्टाङ्गयोगस्य मूलाधार:—यमनियमा: | *—डॉ० राजेश बतरा* | १६ |
| ५. | फलाभिसन्धिभेदादवयवनामपि क्रियात्वम् | *—डॉ० रामसलाहीद्विवेदी* | २१ |
| ६. | उपनिषत्सु आध्यात्मिकचिन्तनम् | *—डॉ० राधेश्याम गंगवार:* | २७ |
| ७. | संस्कृतस्य उन्नयने अवरोधा: उपायाश्च | *—डॉ० आभा झा* | ३१ |
| ८. | एकार्थीभावव्यपेक्षाभाववादिनां मतानि | *—श्री लीलाधर भट्टराई* | ३७ |
| ९. | रत्नावल्यां नाट्यतत्त्वम् | *—डॉ० सुमन कुमारी* | ४२ |
| १०. | शैवविशिष्टाद्वैतवेदान्तस्य मौलिकता | *—श्री शंकरदत्त:* | ४७ |
| ११. | भाषाशास्त्रीयदृशा पदसंरचनाविवेचनम् | *—श्री अजीतकुमार:* | ५० |
| १२. | वैदिक सोम—एक विवेचन | *—डॉ० धर्मेन्द्रकुमार:* | ५३ |
| १३. | ''अमृतनाभि-गौ—एक विवेचनात्मक अध्ययन'' | *—डॉ० सुभाष विद्यालंकार* | ६५ |
| १४. | मर्यादा पुरुषोत्तम राम की ऐतिहासिकता | *—डॉ० सत्यपाल सिंह* | ७१ |
| १५. | वैदिक समाज व्यवस्था एवं विश्वबन्धुत्व | *—डॉ० धर्मेन्द्र कुमार* | ८१ |
| १६. | मृच्छकटिकम् में मानवाधिकार | *—शुभांगी गायकवाड लांजेवार* | ८९ |
| 15. | Vedic Philosophy | *—Ganga Prasad Upadhyay* | 94 |


***—::0::—***

# पुरुषार्थचतुष्टयम्

—पं० रामनारायणः शास्त्री

**पुरुषार्थस्य प्रभावेण तमस्तरतिदुस्तरम्।**

पुरुषेण अर्थ्यत इति पुरुषार्थः। अर्थशब्दोऽत्र प्रयोजनपर्यायः। यत्पुरुषस्य प्रयोजनन्त-देवतेनार्थ्यते। एतावता पुरुषस्य प्रयोजनमेव पुरुषार्थः। दुःखनिवृत्तिपूर्वकं सुखप्रापणमेव पुरुषस्य प्रयोजनम्। यथा चाह महर्षिः कपिलः सांख्यकारिकाकारईश्वरकृष्णश्च। अथ त्रिविधदुःख्यात्यन्त-निवृत्तिरत्यन्तपुरुषार्थः। दुःखत्रयाभिधाताज्जिज्ञासा तदपघातके हेतौ[१]। पुरुषार्थशब्दं परिभाषयन् लिखति स्वामीदयानन्दः सरस्वती–सर्वथा आलस्यं त्यक्त्वा उत्तमव्यवहाराणां सम्पादनाय शरीरमनोवाग्धनैर्यद् अत्यन्तं परिश्रमणमस्ति क्रियते वा तदेव पुरुषार्थः कथ्यते। अप्राप्तस्य वस्तुनः प्राप्तीच्छा, प्राप्तस्य सम्यग् रक्षणम्, रक्षितस्य संवर्धनम्, संवर्धितानाञ्च पदार्थानाम् सत्यविद्यानामुन्नत्यै सर्वजनहिताय च व्ययकरणं इत्येतत् चतुष्प्रकारकं कर्म पुरुषार्थ उच्यते[२]। परिभाषायामस्यां यथा पुरुषार्थचतुष्टयं तथैव धर्मार्थकाममोक्षाख्यरूपेण प्रसिद्धं पुरुषार्थचतुष्टयम्।

पृ पालनपूरणयोः[३] इत्यस्माद्धातोः "पुरःकुषन्"[४] इति सूत्रेण कुषन् प्रत्यये सति पुरुष शब्दस्य निष्पत्तिः। पिपर्ति पालयति पूरयति पिण्डं ब्रह्माण्डं वा सः पुरुषः। अत्र प्रकरणे पिण्डपालक पूरकश्च आत्मैवभिप्रेतः, न च ब्रह्माण्डपालकः परमात्मा। पुरुषो योऽयं पवते योऽस्यां पुरि शेते तस्मात्पुरुषः[५]। तेन पुरुषेण आत्मना योऽर्थ्यते प्रार्थ्यते अभीष्टसिद्धये स पुरुषार्थ इत्याचक्षते।

कः पुरुषः? किं स्वरूपः पुरुषः? कानि वा अङ्गानि पुरुषः? इति प्रश्ने सम्प्राप्ते–शरीरम् मनो बुद्धिः आत्मा चेति चतुर्णामेतेषां समष्टिरेव पुरुषः। चत्वार्येवाङ्गानि सन्ति पुरुषे–शरीरम् मनोबुद्धिरात्मा च। यथा चाहुब्राह्मणानि। एतावान् पुरुषो यदात्मा[६]। एकादशो वाऽयं पुरुषो दशप्राण आत्मैकादशः[७]। काममय एवायं पुरुषः[८]। पञ्चविंशो खलु वै पुरुषः। दश वै पुरुषस्य हस्तांगुलयो दशपद्याश्चत्वारि प्रांगानि आत्मा पञ्चविंशः[९]। षोडशकलो वै पुरुषः[१०]। षोडशकलः पुरुषो लोमेति द्वे अक्षरे त्वगिति द्वे असृगिति द्वे मांसमिति द्वे पास्विति द्वे अस्थीति द्वे मेद इति द्वे मज्जेति द्वे ताः षोडश सम्पद्यन्ते[११]। विज्ञानमयोऽयं पुरुषः[१२]। एभिर्ब्राह्मणवचनैः सुस्पष्टं यत् शरीरम्मनोबुद्धिरात्मा च इत्येष एव पुरुषः। एतेषां चतुर्णामङ्गानां शुद्ध्यै गुप्त्यै च चतुर्णामेव पदार्थानामावश्यकता वर्तते। यथा च भणति भगवान् मनुः।

**अद्भिर्गात्राणि शुद्ध्यन्ति मनःसत्येन शुद्ध्यति।**
**विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति॥**[१३]

शरीरमनोबुद्धिरात्मनां चतुर्णाम् विकासाय संसिद्धये च पुरुषेण यानि साधनानि अर्थ्यन्ते तानि चत्वार्येव। तेषां साधनानामभिधानेव पुरुषार्थचतुष्टयम्। शरीराय अर्थस्य (धनस्य) मनसे कामस्य बुद्ध्यै धर्मस्य आत्मे च मोक्षस्य परमावश्यकता, एतावता धर्मार्थकाममोक्षाख्यमेव पुरुषार्थचतुष्टयम्।

पुरुषे शरीरं प्रथमं प्रत्यक्षञ्च, अतएव बभाण महाकविः कालिदासः—शरीरमाद्यं खलु

धर्मसाधनम्[१४]। शरीरम्भौतिकम्। भोगायतनं शरीरम्। एतावता समेऽपि भौतिका भोग्यपदार्था अत्र अर्थपदवाच्याः। विश्वस्य निखिलाः पदार्था मानवायैव सन्ति। मनुष्यं विहाय अन्ये प्राणिनः पदार्थानिमान् नोपभोक्तुं क्षमाः, परं मानवेन एतेषां केवलमुपभोगो नैव कर्तव्योऽपितु सदुपयोगो विधेयः। सदुपयोगेनैव=धर्मपूर्वकोपभोगेनैव पदार्था अभीष्टसाधकाः पुरुषार्थवाचकाः नो चेत् तस्य (मानवस्य) विनाशकाः। एतेनैव यजुर्वेदे कथितम्—**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्**[१५]। अर्थश्च मे यज्ञेन कल्पताम्[१६]। पुरुषार्थचतुष्टयेन यानि साधनानि ज्ञायन्ते तेषां समेषां सेवनं सहैव कर्तव्यं येन ते अनासाक्तभावेन सेव्येरन् नैकेन केनापि सह आसक्तिर्भाव्या। अतएवोक्तम् धर्मार्थकामाः सममेव सेव्याः, यो ह्येकसक्तः स जनो जघन्यः।

शरीरमनु मनो द्वितीयमङ्गम्। इन्द्रियाणां प्रसङ्गे मनः कर्मज्ञानेन्द्रियाभ्यां द्वाभ्यामपि सह वर्तते अतएव उभयात्मकं मनः[१७]। संकल्पविकल्पौ मनसो धर्मौ। संकल्पविकल्पावेव कामः। एतेनैव भणति आरण्यककारः—मनसि वै सर्वे कामाः श्रिताः[१८]। कामं विना कापि क्रिया किमपि च कर्म न सम्भवति, अतएव बभाषे राजर्षिर्मनुः—

**अकामस्य क्रिया काचिद् दृश्यते नेह कर्हिचिद्।**
**यद्यद्धि कुरुते किञ्चित् तत्तत् कामस्य चेष्टितम्॥**[१९]

मनसान्तरेणापि न किमपि क्रियते। यथा च वेदः—यस्मान्न ऋते किञ्चनकर्म क्रियते[२०]। एतेन मनसा सहकामस्य सम्बन्धः सुव्यक्तः।

सृष्टेरारम्भावस्थायां प्रथमं काम एवासीदिति ऋग्वेदीयं वचः। कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्[२१]। निखिलोऽपि ब्रह्माण्डे किमपि वस्तुजातं प्राणिजातं वा कामरहितं नास्ति न च सम्भवः, यतोहि जगतोऽस्य समस्तोऽपि आदान-प्रदानात्मको व्यवहारः कामाश्रित एव। यथा यजुर्वेदः—कोऽदात् कस्मा अदात् कामोऽदात् कामायादात्। कामो दाता कामः प्रतिगृहीता कामैतत्ते[२२]॥ इत्थं सर्वं कामेनैव भवतीति दरीदृश्यते, यतो हि कामपूर्तय एव यज्ञ इज्यते। सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते[२३]।

काम अकामो दुष्कामो मा भवेत् सुकामो धर्मसम्मितो यज्ञसम्मितो वा स्यादिति वेदेऽपि प्रार्थना विद्यते। कामश्च मे यज्ञेन कल्पताम्[२४]। यज्ञसम्मितः कामः, यस्मै यज्ञः प्रयुज्यते स कामः, अथ च यः सृष्टिरचनायां मूले समवर्तत स कामः पुरुषार्थचतुष्टये परिगण्यते न च अमर्यादितः कामः।

पुरुषार्थचतुष्टये तृतीयः पुरुषार्थो धर्मः पुरुषे बुद्धिश्च तृतीयमङ्गम्। धर्मेण सह बुद्धेः सम्बन्धः प्रसिद्ध एव। अध्यवसायो बुद्धिः तत्कार्यं धर्मादिः[२५]। अध्यवसायो बुद्धिर्धर्मो ज्ञानं वैराग्यमैश्वर्यामिति[२६]। एनं सांख्यसिद्धान्तं स्वीकृत्य बुद्धेर्धर्मादि कार्याणि च हृदि निधायैव योरोप निवासी श्रीमान् हक्सले महोदयः कथयामास। सत्यविज्ञानं सत्यधर्मश्च द्वावपि यमजौ स्तः। अनयोरेकतरस्य पृथकत्वे सति द्वावपि मरिष्यतः। विज्ञाने यावती धर्मसम्बन्धिनी आस्था भविष्यति तावत्येव तस्योन्नतिर्भविता। विज्ञानस्याभ्यासकाले यावदधिकधर्मवृत्तिर्भवति तावदधिकमेव विज्ञानविषयकमन्वेषणं गहनं भवति, विज्ञानस्याधारो यावान् दृढीयो भवति तावानेव धर्मविकासोऽ-प्यधिको भवति। तत्त्वविज्ञैर्द्यावधिकृतेषु कार्येषु तेषां बुद्धिवैभवमेव कारणन्नास्ति-अपितु तेषां

धार्मिकवृत्तिरेव तत्राधिककारणत्वेनावतिष्ठते[२७]। एतेनेदं स्पष्टं यद् बुद्धया सहधर्मस्य घनिष्ठः सम्बन्धो विद्यत इत्यत्र नास्ति काचिद् विप्रतिपत्तिः।

यः पदार्थान् प्राणिनश्च धारयति, अथ च यं पदार्थाः प्राणिनो वा धारयन्ति स धर्मः। धृञ् धारणे[२८] इत्स्माद् धातोर्मन्[२९] प्रत्यये सति धर्म शब्दस्य निष्पत्तिः। माध्यन्दिनशतपथब्राह्मणं धर्मं स्पष्टयन् लिखति एष वै धर्मो य एष तपत्येष हीदं सर्वं धारयत्येतेनेदं सर्वं धृतम्[३०]। धारणादेव जना धर्मे रमन्त-इति कथयति तैत्तिरीयारण्यकम्—धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुश्चरं तस्माद् धर्मेरमन्ते[३१]। धारणत्वेन धर्मो धर्मः कथ्यत इति महाभारतमपि वदति।

धारणाद् धर्ममित्याहुर्धर्मो धारयते प्रजाः। यत्स्याद् धारणसंयुक्तः सधर्म इति निश्चयः[३२]॥ एकोनविंशत्या शताब्द्या अग्रगण्यः समाजसुधारकः स्वामी दयानन्दः सरस्वती धर्ममित्थं परिभाषयति—यः परमेश्वरस्य आज्ञाया यथावत्पालनस्वरूपः पक्षपातरहितः न्यायसंयुक्तः सर्वहितकरः प्रत्यक्षार्दिभिः प्रमाणैः सुपरीक्षितो वेदोक्तत्वात् सवैर्मानवैर्मान्य एकश्च स धर्मः कथ्यते[३३]।

धर्मस्य विचारचर्चायां को धर्मः? किं स्वरूपो धर्मः? किं फलो वा धर्मः? बहवोऽनुयोगाः समापतन्ति चेतसि। प्रश्नेष्वेतेषूपस्थितेषु स्मृतिपथमवतरति महर्षिः कणादः। स उत्तरयति— यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः[३४]। यतः=यदनुष्ठानाद् अभ्युदयस्य= अभिमुखीभूतस्योदयस्य भाविन उत्कर्षस्य=इह परत्र च जन्मनि सांसारिकसुखैश्वर्यस्य पुनश्च निश्श्रेयसस्य=नितान्तकल्याणस्य मोक्षस्य सिद्धिर्भवेत् स धर्मः, स खलु धर्मपदवाच्यः। सूत्रस्यास्य व्याख्याने स्वामिब्रह्ममुनिः परिव्राजको लिखति—न केवलं सांसारिकसुखैश्वर्यं धर्मो न च मोक्षमार्गचिन्तनमात्रं धर्मः किन्तूभय सहभावो यद् वा उभयसम्पत्ति धर्मः। तदत्र वैशिष्ट्यं यदभ्युदयभूमिकोपरि निश्श्रेय-समवतिष्ठतेऽथ च निःश्रेयसस्यच्छायायामभ्युदयः सम्प्रतिष्ठते[३५]।

पुरुषार्थचतुष्ट्येऽन्तिमः पुरुषार्थो मोक्षः पुरुषे चान्तिममङ्गमात्मा। पुरुषाङ्गगणनायाम् आत्मा केन्द्रोऽन्तिमश्च। आत्मानमेवोद्दिश्य पुरुषस्य पुरुषार्थस्य च विचारचर्चा प्रवर्तते। पुरुषार्थचतुष्टयमित्यत्र गणनाक्रमः प्रसिद्ध धर्मार्थकाममोक्ष इति। अर्थः कामो धर्मो मोक्ष इति अस्माकं पुरुषार्थचतुष्टयस्य गणनाक्रमः। एष क्रमः पुरुषं हृदि निधायैव अस्माभिर्निर्धारितः, यतोहि तत्र प्रथमं शरीरम् द्वितीयम् मनः, तृतीयं बुद्धिस्तुरीयञ्च आत्मा। एतावता कस्य केन सह सम्बन्ध इति विचारणादेष क्रमः परिवर्तितः। क्रमेऽस्मिन् धर्मो मध्ये वर्तते। पूर्वम् अर्थकामौ पश्चाच्च मोक्षः। अभ्युदयेन अर्थकामौ ज्ञायेते निःश्रेयसा च मोक्षः, अतो धर्मेण द्वापादि सिध्यतः। धर्मेण मोक्षप्राप्तिर्भवतीति प्रसिद्धम्, परमार्थकामावपि धर्मेण सिध्यत इति वैशेषिकसूत्रेण सुस्पष्टम् अथ च कृष्ण-द्वैपायनव्यसस्योद्घोषेण—

**ऊर्ध्वबाहूर्विरोम्येष नैव कश्चिच्छृणोतिमाम्।**
**धर्मादर्थश्चकामश्च स धर्मः किन्न सेव्यते?॥**[३६]

पुरुषार्थचतुष्टये अर्थकामधर्मा इति त्रिवर्गो मोक्षस्य साधनभूतः साध्यः पुरुषार्थस्तु मोक्ष एव, अतो मोक्ष एव परमः पुरुषार्थः। त्रिविध दुःखानामात्यन्तिकीनिवृत्तिर्मोक्षेनैव सम्भवः। ''मुच्लृ मोक्षणे'' इत्यस्मात् सनन्तात् मुमुक्ष धातोर्धत्रिप्रत्यये सति गुणे अभ्यासलोपे च कृते

मोक्षशब्दस्य निष्पत्तिः[३७]।

एतेनेदं सुस्पष्टं यत् त्रिवर्गेण पुरुषस्य लक्ष्यपूर्तिर्न भवति। कथमिति जिज्ञासायाम्-त्रिवर्गस्त्रिगुणसंयुक्तः त्रिगुणत्वाच्च भौतिकं प्राकृतिकं क्षेत्रम् मोक्षस्तु त्रिगुणातीतस्याध्यात्मस्य क्षेत्रम्। अतएव मोक्षैव परमः पुरुषार्थः सैव च पुरुषस्यान्तिमः परमो ध्येयः। एतावतैव महाभारतकारः त्रिवर्गनिवृत्तिं मोक्ष इत्याचक्षते। मूलमेतत् त्रिवर्गस्यनिवृत्तिर्मोक्ष उच्यते।

**सन्दर्भग्रन्थ—**


१. सांख्यदर्शनम् १,१ ॥ सां०का० १ ॥
२. आर्योद्देश्यरत्नमाला पद सं० ५५,५६ ॥
३. धातुपाठ जुहोत्यादिगण ५ ॥
४. उणादिकोष ४,७४ ॥
५. मा०श०ब्रा० १३,६,२,१ ॥
६. ता०ब्रा० ३,४,३। ३,१३,३ ॥
७. का०श०ब्रा० ३,१,४,१ ॥
८. मा०श०ब्रा० १४.७.२.७ ॥
९. जै०ब्रा० २.३५४ तथा २.४१३ ॥
१०. जै०ब्रा० १.१३१ तथा तै०ब्रा० १.७.५.५। मा०श०ब्रा० ११.१.६.३६।
११. काठक सं० २२.३०५।
१२. मा०श०ब्रा० १४.४.३.५।
१३. मनुस्मृतिः ५.१०९
१४. कुमारसम्भवम् ५.३३।
१५. यजुर्वेदः ४०.१।
१६. यजुर्वेदः १८.१५।
१७. सांख्यदर्शनम् २.२६।
१८. ऐ०आ० १.३.२।
१९. मनुस्मृतिः २.३।
२०. यजुर्वेदः ३४.३।
२१. ऋग्वेदः १०.१२९.४।
२२. यजुर्वेदः ७.४० तथा तै०ब्रा० २.२.५.६।
२३. तै०सं० २.४.११.२।
२४. यजुर्वेदः १८.८ तथा तै०ब्रा० ४.७.३.१।
२५. सां० द० २.१३-१४।
२६. सां०का० २३।
२७. हर्वटस्पेंसर रचित 'एजुकेशन'।
२८. धातुपाठ भ्वादिगण ६४१।
२९. उणादिकोष १.१४०।
३०. मा०श०ब्रा० १४.२.२.२९।
३१. तै०आ० १०.६२.१।
३२. महाभारत कर्णपर्व १५.३६ तथा शान्तिपर्व ३१.६।
३३. आयोद्देश्योरत्नमाला पद सं० २।
३४. वैशेषिक दर्शनम् १.१.२।
३५. वै०द० ब्रह्ममुनिभाष्य १.१.२।
३६. महाभारत स्वर्गारोहण पर्व ५.६२।
३७. धातुपाठ तुरादिगण १३८।


—प्रवक्ता संस्कृत विभागः
राजकीय स्नातकोत्तर महाविद्यालयः,
सिरोही (राजस्थानम्)-३०७००१

# वैदिकसाहित्येऽलङ्कारतत्त्वमीमांसा

**—डॉ० श्यामसुन्दरठाकुरः**

भारतीयमान्यतानुसारं वेद इति कथनेन सर्वेषां ज्ञानराशिसमुपेतानां ग्रन्थानां बोधो भवति। जगति यत्किमपि ज्ञानतत्त्वमस्ति तस्य सूक्ष्मरूपं वैदिकसाहित्ये निर्दिष्टमस्ति। यथा बीजात्मके कारणे विशालकार्यरूपवटवृक्षः सूक्ष्मरूपेण अन्तर्निहितोऽस्ति। वैदिकसाहित्यानुशीलनेन ज्ञायते यद् मन्त्रेषु ब्राह्मणादिग्रन्थेषु च काव्यशास्त्रस्य विविधानि तत्त्वानि समुपवर्णितानि सन्ति। यद्यपि वेदेन सह काव्यशास्त्रस्य प्रत्यक्षरूपेण सम्बन्धो न दृश्यते, तथापि परोक्षरूपेण वैदिकसाहित्ये काव्यतत्त्वं विकीर्णं यत्र-तत्र उपलभ्यते।

वस्तुतो मन्त्रद्रष्टारः ऋषयः कवयो भवन्ति। ते क्रान्तदर्शिनो भवन्ति। उक्तञ्च वेदभाष्यकारेण भगवता महीधराचार्येण—''**अतीतानागतदूरवर्तिपदार्थानां यस्य युगपद् ज्ञानं भवति सः कविः।**'' तादृशः क्रान्तद्रष्टा ऋषिरेव भवति। अतएव तेषामृषीणां काव्यं शाश्वतं भवति। उक्तञ्चाथर्ववेदे—''**पश्य देवस्य काव्यं न ममार न जीर्यति।**'' (अथर्व० १०.८.३२) तथा च नाट्यशास्त्रप्रणेत्रा भरतेनापि प्रोक्तम्—

''**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसान् आथर्वणादपि॥** (नाट्य० १.१७)

उपर्युक्तैर्वचनैः सिद्ध्यति यद् वेदः काव्यरूपोऽस्ति। तत्र काव्यस्य सम्पूर्णं तत्त्वं विद्यमानमस्ति। साहित्यशास्त्रे काव्यसौन्दर्याधायकानि यानि गुण-रीति-ध्वन्यलङ्कारादीनि तत्त्वानि विवेचितानि सन्ति, तेषां सर्वेषां तत्त्वानां मूलं वेदे सन्निहितमस्ति। प्रस्तुतेऽस्मिन् शोधपत्रे अलङ्कारविषयमधिकृत्य विश्लेषणं कृतमस्ति।

काव्ये अलङ्कारस्य विशिष्टं महत्त्वमस्ति। अलङ्करोतीत्यलङ्कारः। अलङ्क्रियतेऽनेनेति वा अलङ्कारः। अलं+कृ+घञ् इत्यनेन अलङ्कारशब्दः निष्पद्यते। अलङ्कारशब्दस्य व्युत्पत्तिलभ्यार्थोऽस्ति सौन्दर्यवर्धक इति। उक्तञ्च केनापि आचार्येण—

''**न कान्तमपि निर्भूषं विभाति वनिताननम्।**'' अर्थात् यथा माधुर्यादिगुणयुक्ताऽपि वनिता अलङ्कारैः एव शोभते, न तथा अलङ्कारविहीना। अतएव वक्तुं शक्यते यत् काव्ये सौन्दर्यवर्धकं तत्त्वमलङ्कारोऽस्ति। शब्दार्थभेदेन मुख्यतया अलङ्काराणां त्रैविध्यमस्ति।

(क) शब्दालङ्कारः—अनुप्रास-यमकादयः।

(ख) अर्थालङ्कारः—उपमा-उत्प्रेक्षादयः।

(ग) श्लेष उभालङ्कारो वर्तते।

वैदिकसाहित्येऽलङ्कारतत्त्वम्—

वैदिकवाङ्मये अलङ्कारतत्त्वं यत्र-तत्र वर्णितमस्ति इति पूर्वमुक्तम्। अत्र लक्षणेन सह उदाहरणं प्रस्तौमि। भगवता यास्काचार्येण निरुक्ते उपमालङ्कारः परिभाषितः।

''अथात उपमाः। यदतत्तत्सदृशमिति गार्ग्यः।'' (निरुक्तम् ३.२) अर्थात् किमपि वस्तु तद्

नास्ति परन्तु तत् सदृशं प्रतिभाति तत्र उपमा अलङ्कारः। मम्मटेनापि निगदितम्—''साधर्म्यमुपमा भेदे।'' (काव्य० १० उल्लास) उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सम्बन्ध उपमा। यथा—''वृक्षस्य नु ते पुरुहुत वयाः।'' (ऋ० ४.६.१७)।

अत्र भारद्वाज ऋषि इन्द्रं प्रति कथयति—हे पुरुहुत (इन्द्रः) ते (तव) वयाः (शाखाः) वृक्षस्य अर्थात् वृक्षसदृशं, नु (इव)।

कथनस्याभिप्रायो विद्यते यत् हे इन्द्र भवतः विस्तारो वृक्ष इव वर्तते। अत्र वयाः (शाखाः) उपमेयः, वृक्ष उपमानः, नु इति उपमावाचकशब्दः। यथा वृक्षस्य शाखाः विस्तृताः भवन्ति तथैव इन्द्रस्य विस्तृतं रूपमस्ति। अतएव उक्तम्—''रूपं रूपं मघवा वो भवति।'' अर्थात् इन्द्रस्य बहूनि रूपानि सन्ति। अयमेव विस्तारः इन्द्रस्य।

वेदे इव, न, चित्, नु एते उपमार्थे भवन्ति। तदुक्तञ्च—

**''तेषामेते चत्वार उपमार्थे भवन्ति।''** —(निरुक्तम् १.२)

लौकिकसंस्कृतभाषायां केवलं ''इव'' एव उपमार्थे प्रयुज्यते परन्तु वेदे एते उपर्युक्ताः इवादयः सर्वेऽपि उपमार्थिया भवन्ति। तेषां क्रमेण उदाहरणानि सन्ति—

(क) ''इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय।'' (ऋ० ८.८.३१) अर्थात् यथा स्वर्गे इन्द्र एवमिह लोके त्वं ध्रुवः शाश्वतस्तिष्ठ स्थिरो भव।

(ख) ''मृगो न भीमः कुचरो गिरिष्ठाः''। (शु.यु.वे. १८.७१) अत्र यज्वा प्रार्थयति, हे इन्द्र भवान् मृगः (सिंहः) इवभीमः। अर्थात् भयङ्करः। यथा मृगः दूरादेत्य प्राणिनं हन्ति, तथैव त्वमत्र आगत्य शत्रुं विनाशय। अत्र ''न'' उपमावाचकः।

(ग) ''दधिचिदित्युपमार्थे।'' (निरुक्तम् १.२)

(घ) ''वृक्षस्य नु ते पुरुहुत वयाः।'' (ऋ० ४.६.१७.३) हे इन्द्र तव विस्तारो वृक्ष इव वर्तते। अत्र ''नु'' उपमावाचकः समासेनात्र उपमालङ्कारः विवेचितः। अग्रे अनुप्रासस्य उदाहरणं प्रस्तौमि।

मम्मटाचार्येण अनुप्रासस्य लक्षणं निगदितम्—''वर्णसाम्यमनुप्रासः।'' स्वरवैसादृश्येऽपि व्यञ्जनसदृशत्वं वर्णसाम्यम्। रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः। यथा—''नव पलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्। मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोहरैः॥'' तथैव वेदेऽपि अनुप्रास-अलङ्कारो दृश्यते—''धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः।'' (शु.य.वे. १.८)

एतादृशानि बहूनि उदाहरणानि वेदे समुपलभ्यन्ते इति।

निष्कर्षः—अस्य शोधपत्रस्यायं निर्गलितोऽर्थोऽस्ति यद् वेदे सर्वं निहितमस्ति। यदन्यत्र नोपलभ्यते तत् सर्वं वेदे प्रत्यक्षरूपेण परोक्षरूपेण वा सन्निहितमस्ति इति वक्तुं शक्यते। नाट्याचार्येण भरतमुनिना वेदस्य यद् बीजरूपं तत्त्वं साहित्यशास्त्रे निहितं, तदेव साहित्यवृक्षरूपेण विस्तृतं दरीदृश्यते इति।

—लक्ष्मी कुण्ड, वाराणसी-५
उत्तरप्रदेशः

# वैदिकवाङ्मये लोकप्रबन्धनम्

**—डॉ. जीतराम भट्टः**

वैदिकवाङ्मयं खलु संसारस्य सर्वाधिकं प्राचीनं प्रामाणिकं मौलिकञ्चेत्यत्र नास्ति कापि विप्रतिपत्तिः विदुषां वैज्ञानिकानाञ्च मध्ये। इत्यपि सर्वे स्वीकुर्वन्ति यद् वेदेषु समेषां ज्ञान-विज्ञानविषयाणां सूत्राणि प्राप्यन्ते। यथाऽन्येषां विषयाणां तत्त्वानि प्राप्यन्ते तथैव प्रशासनस्य प्रबन्धनस्य वा स्रोतांस्यपि वेदा एव सन्ति। संगठनं संघटनं वा प्राचीनकालादेव मानवसमाजस्य मूले आसीदितीहासविदः सूचयन्ति। संगठनेन बिना प्रबन्धनस्य परिकल्पनाऽपि नैव भवितुं शक्यते संगठनञ्च लोकोपयोगि भवितव्यमत एव वेदेषु मानवतायाः रक्षणेन सदाचारेण परोपकारभावनया च सह संगठनस्य निर्देशो विद्यते। अथर्ववेदेऽस्मिन् विषये स्पष्टं निर्दिशति ऋषिः—

**सं गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते।।**[१]

समाजे संगठनस्य कृते जनेषु समानतायाः भावनाऽऽवश्यकी विद्यते। यतः भेदबुद्धिस्तु विघटनमेव कारयति न तु संगठनम्। अत एव अथर्ववेदीय ऋषिणा निर्दिष्टम्—

**समानी व आकूतिः समाना हृदयानि वः।**
**समानवस्तु वो मनो यथा वः सुसहासति।।**[२]

जगति यदा मानवाः एकत्रीभूय स्वकीयानि करणीयानि कार्याणि कुर्वन्ति तदा तेषु संगठनस्य भावना स्वत एव प्रादुर्भूता भविष्यति। याः का अपि कुरीतयः सन्ति ताः परित्यज्य परस्परं मिलित्वा ऐक्येन सह निवसेयु इत्येवाथर्ववेदस्य मन्त्रेऽस्मिन् कामना विद्यते।

**समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि।**
**सम्यञ्चोऽग्निं सपर्यतारा नाभिमिवाभितः।।**[३]

संघटनाय संगठनाय वा परस्परं साहचर्यभावेन व्यवहरणीयमतः लोकजागरणमावश्यकमस्ति। एतदर्थं जनेभ्यः समानतायाः संगठनस्य च कृते ज्ञानं प्रदीयात् यथाऽथर्ववेदीय ऋषिः वदति।

**तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः।**[४]

इत्थं संगठने यदि समितेः सर्वोच्चाधिकारी प्रमुखो वा जनैः सह मिलित्वा परस्परं साहचर्यभावेन कार्यं कुर्यात्तर्हि संगठनस्य स्वरूपं दृढं भवति। यथा सृष्टौ ईश्वरोऽपि लोकेन सह सामरस्यं संस्थाप्य सर्वान्नैक्यभावे संयोजयति तथैव प्रबन्धने प्रशासने वा संगठनप्रमुखः सर्वैः सह समानभावेन व्यवहरेदित्यथर्ववेदे द्रष्टव्यम्-

**ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि।**[५]

संगठने वर्णभेदः लिंगभेदः वर्गभेदश्च परिहर्त्तव्याः आर्येषु ब्राह्मणेषु प्रशासकेषु शूद्रेषु च

कोऽपि विभेदो न भवेत्। वेदे मनुष्या अग्निदेवं प्रार्थयन्ति यद्वयं राज्ञां देवानाञ्च प्रियाः भवेम। संगठने निम्नान् शूद्राञ्च प्रत्यपि सम्मानभावो भवेदित्यथर्ववेदस्यास्मिन्त्रे द्रष्टव्यम्–

**प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।**
**प्रिय सर्वस्य पश्यत उत शूद्र उतार्ये॥**[६]

संगठनस्य दृढतायै लोके न केवलं पुरुषाणामपितु स्त्रीणां बालकानाञ्चापि सम्मानः करणीयः, यदि स्त्रियो बालकाश्च शिक्षिता संस्कृताश्च भवन्ति, तर्हि संगठनस्य कृते योग्याः सदस्याः निर्मिता भवन्ति। स्त्रीणां बालकानां शारीरिकस्वास्थ्यस्य मानसिकविकासाय च प्रयासाः करणीयाः तदैव संगठनस्य प्रशासनस्य वा संघटनं दृढीभवति। यथाऽथर्ववेदस्य मन्त्रेऽस्मिन्नुखितं विद्यते।

**सूषा व्यूऽर्णोतु वि योनिं हापयामसि।**
**श्रथया सूषणे त्वमव त्वं विष्कले सृज॥**[७]

यस्मिन् समाजे स्त्रीणं दशा समीचीना भवति तत्रत्याः सामाजिकाः स्वस्थाः संस्कृताः संगठिताश्च भवन्ति, अथर्ववेदे स्त्री साम्राज्ञीति संज्ञया सम्मानिता वर्तते, यतः सा साम्राज्ञीवत् स्वसन्ताने संगठनगुणानाविष्करोति, अनन्तरं तस्याः सन्ततिः परस्परं साहचर्यभावेन व्यवहर्त्तुं योग्या भवति। अथर्ववेदेऽस्य विवेचनं द्रष्टव्यम्।

**यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा।**
**एवा त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य॥**[८]

परिवारेषु यदि मातापितरौ पुत्रं प्रति पुत्रश्च पितरौ प्रति पतिः पत्नीं प्रति पत्नी च पतिं प्रति माधुर्यपूर्ण व्यवहारं कुर्वन्ति तर्हि परिवाराणां संगठनानि दृढानि भवन्ति यदि परिवाराः दृढा भवन्ति तर्हि समाजो दृढो भवति यदि च समाजो दृढो भवति तर्हि राष्ट्रं दृढं भवति।[९] भ्रातरः परस्परं द्वेषं न कुर्वन्तु स्वसृभिः सह प्रेम्णा व्यवहरन्तु, परिवारस्यान्यैः सदस्यैः सहापि संस्कृतं व्यवहारं कुर्वन्तु।[१०] गृहे परस्परं समतायाः व्यवहारः परिवारसदस्येषु प्रेम्णः सञ्चारं करोति, प्रेम्णा एव पारिवारिकं संगठनं दृढं भवति।[११] ये जनाः संगठिता भवन्ति ते कदापि परतन्त्रा न भवन्ति, वस्तुतः द्वेषभावनयैव जनाः परतन्त्रा भवन्ति।

**यो न द्वेषत् पृथिवी यः पृतन्याद् योऽभिदासान्मनसा यो वधेन।**
**तं नो भूमे रन्धय पूर्वकृत्वरि॥**[१२]

संगठनस्य रक्षायै जनेषु सत्यं निष्ठा यथार्थबोधः कार्यकुशलता तेजः पराक्रमः तपश्चर्या त्यागः बलिदानञ्चेति गुणा आवश्यकाः सन्ति।[१३] यत्र लोकः नृत्यन्ति यत्र शौर्यपूर्णा जनाः स्वराष्ट्रस्य रक्षायै युद्धरता भवन्ति तत्र शत्रवो रुदन्ति राष्ट्रजनाश्च प्रमुदन्ति।संगठितानां जनानां स्वतन्त्रताऽपि आवश्यकी विद्यते यथाऽथर्ववेदस्य मन्त्रेऽस्मिन्नुक्तमृषिणा–

**यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलबाः।**
**युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः।**
**सा नो भूमिः प्रणुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु॥**[१४]

संगठनस्य दृढतायै संगठनसदस्यानां दैहिकात्मिकस्वतन्त्रताया रक्षाऽप्यावश्यकी विद्यते शारीरिकमानसिकस्वास्थ्यस्य रक्षाऽपि तदैव भवितुं शक्यते। एतादृशा: संगठिता: सदस्या एव शत्रुभिरपराजिता भवन्ति—

**अयं लोक: प्रियतमो देवानामपराजित:।**
**यस्मै त्वमिह मृत्यवे दिष्ट: पुरुष जज्ञिषे**
**स च त्वानु ह्वयामसि मा पुरा जरसो मृथा:।।**[१५]

स्वस्था जना: स्वस्थसमाजस्य निर्माणं कुर्वन्ति संगठनञ्चापि सुदृढं कुर्वन्ति अत एव जनानां स्वास्थ्यरक्षाऽप्यावश्यकी विद्यते। अथर्ववेदे रोगादिभ्यस्त्राणाय विधिर्निर्दिश्यते-

**व्यवात् ते ज्योतिरभूदप त्वत् तमो अक्रमीत्।**
**अप त्वन्मृत्युं निर्ऋतिमप यक्ष्मं नि दध्मसि।।**[१६]

संगठने जना: पुरुषार्थचतुष्टयस्याप्त्यै श्रमं कुर्वन्तु, पुरुषार्थचतुष्टयेऽपि सर्वेषां समानोऽधिकारो भवेत्। अर्थकामयो: सदुपयोग: संगठनस्य विकासाय भवेत्।

**सपत्नहनमृषभं घृतेन कामं शिक्षामि हविषाज्येन।**
**नीचै: सपत्नान् मम पादय त्वमभिष्टुतो महता वीर्येण।।**[१७]

लोके कामस्योपयोग: प्रजासृष्ट्यै भवेत् न तु भोगाय। कामस्तु सुखाय भवति न तु भोगाय। भोगविलासिन: जना: संगठिता: नहि भवन्ति ते सद्य एव नश्यन्ति। कामेनैव सत्प्रेरिता जना: श्रमं कुर्वन्ति, काम: विकासाय भवति न तु विनाशाय। कामेन धनस्य पशूनां आयुषश्च प्राप्तिर्भवति कामेनैव शत्रूणामपि विनाशो भवति।[१८] संगठनाय शिक्षाया: प्रसारोऽत्यावश्यकोऽस्ति। अशिक्षिता जना: नेत्रहीना इव सन्ति। अज्ञानिनो जना: द्वेषपूर्णं व्यवहारं कुर्वन्ति अतस्ते संगठिता नहि भवन्ति। यथा वैद्य: परिष्कृताभिरौषधीभि: बाह्याभ्यन्तररोगान् दूरीकरोति तथैव ज्ञानं संस्कारै: बाह्याभ्यन्तरदोषानपाकरोति यथाऽथर्ववेदे द्रष्टव्यम्-

**यथा द्यां च पृथिवीं चान्तस्तिष्ठन्ति तेजनम्।**
**एवा रोगं चास्रावं चान्तस्तिष्ठन्तु मुञ्ज इत्।।**[१९]

शिक्षया जना: नीरक्षीरविवेकिन: सत्यासत्यपरीक्षकाश्च भवन्ति शिक्षिता जना: विषमपरिस्थिष्वपि वेदादिशास्त्रेषु प्रतिपादितज्ञानात् यज्ञेभ्य: दानात् तपस: सत्याच्च विचलिता न भवन्ति।[२०] संगठिता जना: निर्भया भवन्ति तथापि काले काले जनजागरणमावश्यकमस्ति यत् शिक्षया लोके व्याप्तो भय: दूरीभवेत्। यथा दिवानिशं सूर्यचन्द्रौ ब्रह्मज्ञानी क्षत्रियाश्च कस्मादपि भयभीता न भवन्ति तथैव नहि भेतव्यमित्यथर्ववेद उपदिशति।[२१] संगठनं यस्य कृते विद्यते तं प्रति सर्वेषां निष्ठा भवेत् संगठनञ्च सर्वेभ्य: संरक्षणं प्रयच्छेत्। समिति: भूमिवदस्मान् पोषयति।[२२] संगठने परस्परमेकत्रीभूय जना: ज्ञानेन वर्चसा ऐश्वर्येण च विकासकार्याणि कुर्वन्तु।[२३] साहचर्यभावेन निवसन्त: संगठिता जना: परस्परमायुर्विद्यायशोबलानां वृद्धिं कुर्वन्तु। स्वकीयेनार्जितेन धनेन बलेन ज्ञानेनान्येषां सदस्यानां सहयोग: करणीय: तथैव विषमपरिस्थितिषु संगठनस्य संरक्षणं स्वीकरणीयं भवेदित्यथर्ववेदीय: सन्देशोऽस्ति।[२४] यद्यकस्मिन् कुटुम्बेऽनेकविधवृत्तिवन्त: सन्तोऽपि

जनाः संघटिताः तिष्ठन्ति तर्हि समाजस्य राष्ट्रस्य कृते कथं न संघटिता भवेयुः।[२५] सर्वे जानन्ति यत् एकत्र स्थित्वा परस्परं सहयोगभावनया मिलित्वा जीवनयापनं कुर्वन्नुनयनं नाम एव संघटनमस्ति। संघटने सर्वे सदस्या अन्योन्यस्य पोषकत्वं पूरकत्वञ्च निर्वहन्ति।[२६] संघटने एकस्य सदस्यस्य कल्याणं तदैव सम्भवति यदा समस्तानां कल्याणं भवति। कृषकस्य संघटनकारकान्नुद्धृत्य ऋग्वेदस्य ऋषिः सिद्धान्तमेतं प्रतिपादयति यत्—

**शुनः वाहाः शुनं नरः शुनः कृषतु लांगलम्।**
**शुनं वरत्रा बध्यतां शुनमष्ट्रामुदिंगय।।**[२७]

संगठने यदा व्यक्तिः अपरस्यास्तित्वविषये सचैतन्यो भूत्वाऽऽचरणं करोति तदैव संगठनस्यास्तित्वं दृढं भवति। अस्मिन् विषये निशारात्र्योरुदाहरणं द्रष्टव्यं यदुषा रात्री चोभेऽपि भगिन्यौ इव तिष्ठतः। एकाऽपराया: कृते स्थानं त्यजति।[२८] यावत् संगठितजनानां परिस्थिति-भावनयोः परस्परमैक्यं तिष्ठति, यावत् संगठितव्यक्ते आचरणेऽपरस्यास्तित्वं प्रति चैतन्यं विभाव्यते, यावत् व्यक्तेः सहगमनस्य स्वभावो दृश्यते तावत्पर्यन्तं संगठनं संघठितं भवति, एतेषामभावेन संगठनस्य विघटनं

भवति। अत एव ऋग्वेदस्य ऋषि आदिशति-**उद्बुध्यस्व समनसः सखायः।**[२९] संगठने परस्परं सर्वेऽपि सदस्याः परस्परं भ्रातृत्वभावनां स्थापयित्वा वर्द्धन्ताम्। तत्र कोऽपि ज्येष्ठो नास्ति न वा कोऽपि कनिष्ठः न कोऽपि मध्यमोऽस्ति।[३०] शिल्पी काष्ठकार्य वाञ्छति, भिषक् रोगिणं वाञ्छति, ब्राह्मणः यजमानं वाञ्छति। एवं सर्वेऽपि स्वस्वशक्तियोग्यतानुरूपं कार्य वाञ्छन्ति।[३१] चत्वारो वर्णाः समाजपुरुषस्यापरिहार्यागरूपेण सन्ति। तानि चत्वारि परस्परं प्रति सहयोगं कुर्वन्ति समाजपुरुषञ्च पोषयन्ति। मानवानां प्रवृत्तिर्विविधाः। तत्र चतुर्विधाः प्रवृत्तयस्तु मुख्यतः दृश्यन्ते। ज्ञानप्रमुखा, क्रियाप्रमुखा, कामप्रमुखा श्रमप्रमुखा च। ज्ञानप्रमुखाप्रवृत्तिशीलाः जनाः ब्राह्मणाः सन्ति, क्रियाप्रमुखाप्रवृत्तिशीलाजनाः क्षत्रियाः सन्ति, कामप्रमुखाप्रवृत्तिशीलाः जनाः वैश्याः सन्ति श्रमप्रमुखाप्रवृत्तिशीलाः जनाश्च शूद्राः सन्ति। समाजपुरुषस्य मुखं ब्राह्मणः, क्षत्रियः बाहू, वैश्यः ऊरू शूद्रः पादौ च सन्ति।[३२] सर्वाण्यंगानि परस्परमन्योन्याश्रितानि सन्ति समाजपुरुषस्य संघटनाय। सर्वाण्यपि परस्परमात्मीयभावं धारयन्ति। अत्र न कोऽपि वर्णः श्रेष्ठः न च निम्नः, न उत्तमः न चाधमोऽस्ति। सर्वेऽपि स्वकीयेन कार्येण वर्द्धन्ते। सर्वेषां समानं महत्त्वं समाना चोपयोगिता चास्ति।[३३] प्राचीनकाले सामाजिकसंगठनायैव श्रमविभाजनस्य व्यवस्थाऽऽसीत् श्रमविभाजनाय च ऋषिभिर्वर्णव्यवस्थायाः संकल्पना विहिताऽऽसीत्। विषयेऽस्मिन् रात्र्युषयोः साहचर्य द्रष्टव्यम्। रात्रि उषा च परस्परं विरुद्धस्वरूपवत्यौ तथापि द्वे परस्परं स्नेहपूर्णं दायित्वं निर्वहतः। न काऽपि कस्याः विरोधमाचरति। द्वे हि प्रेम्णा स्थित्वा जगतः हिताय कार्यं कुरुतः।[३४] अनेकतायामेक्येव संगठनस्य मूलं मन्त्रमस्ति। व्यक्तिषु विषमताः स्वाभाविकतया भवन्ति। यतः द्वौ समानौ हस्तौ समानं कार्यं कर्तुं न शक्नुतः। युगलावपि भ्रातरौ समानं कार्य नहि कुरुतः। समाने धेनू समानं दुग्धं न यच्छतः। किन्तु विषमेऽपि समता संघटनायावश्यकी विद्यते।[३५] त्यागेन परस्परं साहचर्य्यं वर्द्धते। एकाकी भोक्ता केवलं पापमेव भुनक्ति।[३६] ऋग्वेदः परामृशति यत् स्वभोजनं चतुर्धा विभज्य अतिथि-सेवक-पशुपक्षि-गृहस्थेभ्यो दापयेत्। एवं कुर्वन् जनः समाजे

देवत्वं प्राप्नोति।[३७] लोके एको जनोऽपरं रक्षेत्। सर्वे प्राणिनः परस्परं सुरक्षिताः निवसेयुः।[३८] साहचर्य्येण सहकार्येण, सहभोजेन सहभावेन च लोके संगठनं भवति।[३९] परस्परं सम्मानभावेन श्रद्धाभावेन प्रेम्णा च लोके वैमनस्यं न तिष्ठति। लोके कनिष्ठो ज्येष्ठः बालो वृद्धः स्वकीयः परकीयः सर्वेऽपि नमस्याः सन्ति।[४०] लोकस्य संगठनाय बालानां महिलानां किशोराणां यूनां युवतीनां वृद्धानां सर्वेषाणामेवावश्यकता विद्यते। सर्वेऽपि संरक्ष्याः सन्ति, अत एव लोकरक्षायै रुद्रः प्रार्थ्यते।[४१] सर्वेऽपि जना अभ्युदयं कुर्वन्तु, अस्माकमभ्युदयाय देवाः प्रार्थ्यन्ते।[४२]

मित्रतायाः भावः परस्परं प्रेम्णः प्रसारं करोति। लोकस्य संगठनाय परस्परं भ्रातृत्वभावः प्रसरेदनेनैव लोकस्य संकटानि दूरीभवन्ति।[४३] परस्परं विश्वासेनैव मैत्री प्रसरति। सख्यं रागद्वेषविहीनं छिद्ररहितं दधिपात्रवद् भवेत्।[४४] सख्यं यदा कल्याणाय भवति तदैव लोके शान्तिः प्रसरति। अतः लोकः मंगलमयाय सख्याय प्रार्थ्यते।[४५] सख्यं लोकसंगठने समत्वं प्रसारयति।[४६] सृष्ट्यां मनुष्या एव परस्परं सर्वाधिकं द्रुह्यन्ति, तद्द्रोहञ्च केवलमीर्ष्यावशात्। यदा चेर्ष्या समाप्ता भवति तदैष एव मनुष्य सर्वाधिकं सामाजिकः प्रेमपरायणश्चापि भवति। अतः प्रार्थ्यते यदस्माभिः सह सर्वे मित्रवत् पितृवच्चाचरयेयुः।[४७] द्रोहः विकासाय बाधकोऽस्ति।[४८] नियमानुसारं कार्यं कृत्वैव जनः शतं वर्षाणि जीवति। अतः देवानां नियमास्त्वनुलंघनीयाः।[४९] वयमपि सूर्यचन्द्रमसाविवानुशासिताः सन्तः संघठितरूपेणान्येषां साहाय्यं कुर्मः।[५०] अस्माकं विचारेषु च सदा शुचिता भवेत्।[५१] अस्माकं बुद्धिः समाना भवेत् वाणी चानुकूला स्याद् वयं परस्परमनुकूला भवेम।[५२] परिवारः समाजस्याधारो वर्तते, यदि चेत् परिवारः सुखी भवेत्तर्हि लोकः सुखी भवेदतः परिवारे वीराः तेजस्विनः कर्मरताः विद्वांसः पुत्राः भवन्विति प्रार्थ्यते।[५३] कुलवध्वप्यैतादृशी भवेद्या वीरप्रसवा भवेदिति प्रार्थ्यते।[५४] सुपुत्रा एव प्रजाः, यदि सुपुत्रा अधिका भवन्ति तर्हि लोकः सामरस्यपूर्णः शान्तिसंवलितः विकासशशीलश्च भवेदत एव दश सुपुत्राणां कामना तत्र दृश्यते।[५५] जनकः प्रजायाः योगक्षेमाय प्रार्थ्यते।[५६] लोकसंगठनाय समाजे सौख्यमावश्यकमस्ति, कुत्रापि दरिद्रता न भवेत्। गृहे प्रचुरमन्नं भवेत्, यद्यन्नं पर्याप्तं भवति तर्हि कुटुम्बभरणे चिन्ता न भवति।[५७]

नृपतिः समाजस्य भरणपोषणार्थं धनिभ्यो धनमाहरेत् दीनेभ्यश्च दापयेत्। लोके जीविकासन्तुलनं स्थापयेत्।[५८] ये खलु लोकहिताय धनं न प्रयच्छन्ति केवलं धनसञ्चयं कुर्वन्ति ते केवलं पापमेव योजयन्ति।[५९] लोकेऽलक्ष्मी न तिष्ठेत् दरिद्रता देशाद् बहिः गच्छेत् लोके च कस्मिन्नपि जने तस्याश्छायापि न पतेत्।[६०] लोकप्रशासने शासकस्य प्रजया सह सौहार्दसम्बन्धो भवति, अत एव प्रजाः शास्तारमिच्छन्ति।[६१]

## शासकस्य निर्वाचनम्

गणतन्त्रे प्रजायाः पार्श्वे शासकस्य चयनाधिकारो भवत्यत एव राज्ञः कृते प्रार्थना विद्यते यत् सर्वेषां प्रदेशानां प्रजाः त्वां शासकस्य रूपे स्वीकुर्युः।[६२] निर्वाचनानन्तरं शासकः प्रजानां मध्ये तथैव राजतां यथा ब्रह्माण्डे आकाशः, पृथ्वी, पर्वताश्च राजन्ते।[६३] शासकस्य चयनमेकया समित्या द्वाराऽपि भवितु शक्यते।[६४] समितिः एव सभा, सभाश्च तिस्रः भवन्ति।[६५] सभा एव 'नरिष्ठा' नाम्नाऽपि ज्ञायते स्म।[६६] सभाया अध्यक्षः सभ्य इति नाम्ना ज्ञायते स्म।[६७] शासनस्य ब्राह्मक्षात्ररूपे द्वे शक्ती भवतः स्म।[६८] कृषिकार्यं प्रजाया आर्थिकवृत्तेः मुख्यं स्रोत आसीदत एव

कृषिकार्य एकस्यैव जनस्याधिपत्यं न भवेदपितु सर्वजनहिताय च भवेदिति निर्दिष्टं विद्यते।[६९] प्रजासु मित्रवद्भाव: प्रसरेदिति प्रार्थ्यते।[७०] यथा एका गौ स्वकीयं वत्सं प्रति प्रेम्णा व्यवहरति तथैव शासक: प्रजा: प्रति व्यवहरेत्।[७१] श्रेष्ठो भवेदथवा हीन: द्विज: स्यादथवा शूद्र: सर्वेऽपि परस्परं प्रेम्णा व्यवहरेयु:।[७२]

यथा आत्मा विश्वात्मनि विलीनो भवति विश्वात्मा चात्मनि विलीनो भवति तथैव प्रजा अपि शासके विलीना: भवेयु: शासकश्च प्रजासु विलीनो भवेत्।[७३] शासक: सभां समितिञ्च संरक्षेत् यथा जनक: स्व द्वे तनये परिपोषयति सभासदाश्च परस्परं प्रेम्णा व्यवहरेयु: तदैव प्रजानां कल्याण: भवति राज्यस्य विकासश्च भवति।[७४] असंगठितसमाजेऽव्यवस्था भवत्यपराधाश्च वर्द्धन्तेऽत एव संगठनं लोककल्याणायावश्यकमिति ज्ञात्वा समाजे परस्परं सम्मिल्य विचारविनिमयस्याभिलाषा जागृताऽभूत्।[७५] अथर्ववेदस्य पृथ्वीसूक्तन्तु समाजवादस्य श्रेष्ठमुदाहरणं प्रस्तौति, यत्र षड् ऋतूणाञ्चक्रं लोकसंगठनायादर्शरूपमस्ति। लोके मुण्डे मुण्डे मतिर्भिन्ना तथापि समाजे प्रेमचक्रेणाबद्धा जना: संगठिता: भवन्ति, सर्वे परस्परं कल्याणायाचरन्ति। यस्यां पृथ्व्यां संगठिता: जना: परस्परं प्रेममग्ना: गायन्ति नृत्यन्ति च। आक्रमणे सति एकीभूयाक्रमन्ति पृथिवीञ्च रक्षन्ति, सा पृथ्वी प्रजाभ्य: सुखकरी स्यादिति प्रार्थ्यते।[७६]

वेदा: सार्वभौमिका: सर्वज्ञानप्रदा: ज्ञानविज्ञानाधारा: मानवसंस्कृतेरुन्नायकाश्च सन्तीति विचार्यैव मया यदपि किमप्युद्बाहुरिव वामनवच्छ्रम: विहित: यदि तत्र काचित्त्रुटि: विद्वद्भि: परिलक्षिता भवेत्तर्हि क्षमायाचनया सह विद्वत्पाठकानां दिग्दर्शनेन कृतार्थी भविष्यामीति मन्ये।

---

**सन्दर्भग्रन्थ—**

१. अथर्ववेद: ६.६४.१
२. अथर्ववेद: ६.६४.३
३. अथर्ववेद: ६.६४.६
४. अथर्ववेद: ३.३०.४
५. अथर्ववेद: ३.३०.४
६. अथर्ववेद: १९.६२.१
७. अथर्ववेद: १.११.३
८. अथर्ववेद: १४.१.४३
९. अथर्ववेद: ३.३०.२
१०. अथर्ववेद: ३.३०.३
११. अथर्ववेद: ३.३०.२
१२. अथर्ववेद: १२.१.१४
१३. अथर्ववेद: १२.१.१
१४. अथर्ववेद: १२.१.४१
१५.अथर्ववेद: ५.३०.१७
१६. अथर्ववेद: ८.१.२१
१७. अथर्ववेद: ९.२.१
१८. यत् ते काम शर्म त्रिवरूथमुख ब्रह्म वर्म विततमनतिव्याध्यं कृतम्।
तेन सपत्नान् परि वृङ्ग्धि ये मम पर्येनान प्राण: पशवो जीवनं वृणक्तु।।-अथर्ववेद: ९.२.१६
१९. अथर्ववेद: १.२.४
२०. मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिन:।
मान्त: स्थुर्नो अरातय।।-अथर्ववेद: १३.१.५९

२१. यथा द्यौश्य पृथिवी च न विभीती न रिष्यतः। एवा मे प्राण मा बिभेः।-अथर्ववेदः २.१५.१
अथर्ववेदः २.१५.२-५
२२. यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः
या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्ने दधातु।। -अथर्ववेदः १२.१.४
२३. अथर्ववेदः १२.१.७
२४. आपो हिष्ठा मयो भुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे। -अथर्ववेदः १.५.१
२५. कारूरहं ततो भिषगुपल प्रक्षिणी नवा।
नानाधियो वसुयवोऽनु गा इव तस्थिमेन्द्रायेन्द्रो परिस्रव:।। -ऋग्वेदः ९.११२.३
२६. ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि।
वा जो अस्मां अवतु वाजसाता-विन्द्रेण युजा त रूपेण वृत्रम्।। -ऋग्वेदः ७.४८.२
२७. ऋग्वेदः ४.५७.४
२८. स्वसा स्वस्रे ज्यायस्यै योनिभारै गपत्यस्याः प्रति चक्ष्मेव।
व्युच्छन्ती रश्मिभिः सूर्यस्याज्ज्यङ्के समनगा इव व्राः।। -ऋग्वेदः १.१२४.८
२९. ऋ. १०.१०१.१
३०. अज्येष्ठासो अकनिष्ठास एते संभ्रातरो-वावृधुः सौभाग्याय। -ऋग्वेदः ५.६०.५
३१. नानानं वा३नो धियो वि व्रतानि जनानाम्। तक्षरिष्टं रुतं भिषग् ब्रह्मा सुन्वतमिच्छतीन्द्रायेन्दो परिस्रव। -ऋग्वेदः ९.११२.१
३२. ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत। -ऋग्वेदः १०.९०.१२
३३. ते अज्येष्ठा अकनिष्ठास उद्भिदो मध्यमासो महसा विवावृधुः। -ऋग्वेदः ५.५९.६
३४. समानो अध्वा स्वस्रोरनन्तस्तमन्याया चरतो देवशिष्टे। न मेथते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे। -ऋ० १.११३.३
३५. समौ चिद्धस्तौ न समं विविष्टः संमातरा चिन्न समं दुहाते। यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तौ न समं पृणीतः। -ऋ० १०.११७.९
३६. केवलाघो भवति केवलादीः। -ऋ० १०.११७.६
३७. एकं चमसं चतुरः कृणोतु न तद् वो देवा अब्रुवन् तद् व आगमम्। -ऋ० १.१६१.२
३८. पुमान् पुमांसं परिपातु विश्वतः। -ऋ० ६.७५.१४
३९. धनान्नदानसूक्तम् -ऋ० १०.११७
४०. नमो मरुद्भ्यो नमो अर्भकेभ्यो नमः युवभ्यो नम आशिनेभ्यः। -ऋ० १.२७.१३
४१. मा नो महान्तमुत मा नो अर्भक मा नो अक्षन्तमुत मा न अक्षितम्।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिष। -ऋ० १.११४.७
४२. अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम्।
प्रणः पूर्वस्मै सुविताय वोचत मक्षु सुम्नाय नन्यसे।। -ऋ० ८.२७.१०
४३. तेभिर्वयं सुषखायो भवेम तरन्तौ विश्वा दूरिता स्याम। -ऋ०१०.३१.१

४४. दृतेरिव तेऽवृकमस्तु सख्यम्। अच्छिद्रस्य दधन्वतः सुपर्णस्य दधन्वतः। –ऋ०६.४८.१८

४५. शिवा नः सख्या सन्तु। –ऋ० ४.१०.८

४६. पुनः कृण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः। –ऋ०३.५९.६

४७. भवा नो अग्ने सुमना उपेतौ सखेव सख्ये पितरेव साधुः। –ऋ०३.१७.१

४८. अद्रुहा देवौ वर्द्धेते। –ऋ० ५.६८.४

४९. न देवानामतिव्रतं शतात्मा चैव जीवति। –ऋ०१०.३३.९

५०. स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। पुनर्ददताघ्नता जानता संगमेमहि। –ऋ०५.५२.१५

५१. विश्वदानी सुमनसः स्याम। –ऋ०६.५२.५

५२. आ भारती भारतीभिः सजोषा इला देवैर्मनुष्येभिरग्निः।
सरस्वती सारस्वतीभिरर्वाक् तिस्रो देवीर्वर्हिरेदं सदन्तु।। –ऋ०३.४.८

५३. सभेयो युवास्य यजमानस्रू वीरो जायताम्। –यजुर्वेद २२.२२

५४. अग्निः सप्तिः वाजम्भरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम्।
अग्निः रोदसी विचरत् समञ्जन्नग्निः नाकीं वीरकुत्सिं पुरन्दिन्।। –ऋ०१०.८०.१

५५. इमां त्वमिन्द्रमीढ्व: सुपुत्रां सुभगां कृणु।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि।। –ऋ०१०.८५.४५

५६. भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरां वीरैः सुपोषः पोषैः। –शु०यजुर्वेद ७.२९

५७. उपहूता इह गाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु नः।
क्षेमाय वः शान्त्यै प्रपद्यै शिवं शग्मं शंयोः शंयोः। –यजु०३.४३

५८. अदित्सन्तं दापयति प्रजानन् स नो रयिं सर्ववीरं नियच्छतु। –यजु० ९.२४

५९. मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि बध इत् स तस्य।
नार्यमाणं पुष्यति नो सखायं केवलाघो भवति केवलादी। –ऋ०१०.११७

६०. अरायिकाणे विकटे गिरिं गच्छ सदान्वे। शिरिन्विढस्य सत्वभिस्तेभिष्ट्वा चातयामसि।
अदो यद् दारु प्लवते सिन्धोः पारे अपुरुषम् तदारभस्व दुर्हणो तेन गच्छ परस्तरम्।।–ऋ०१०.१५५

६१. विशस्त्वा सर्वा वाञ्छन्तु, मा त्वद्राष्ट्रमधि भ्रशत्। –ऋ०१०.१७३.१

६२. त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पञ्च देवीः। –अथर्व०३.४.२

६३. ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वताः इमे।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्।। –ऋ०१०.१७३.४

६४. सर्वाः दिशः संमनसः सध्रीचीध्रुवाय ते समितिः कल्पतामिह।–अथर्व०६.८८.३

६५. त्रीणि राजानः विदथे पुरूणि परि विश्वानि भूषथः सदांसि।–ऋ०३.३८.६

७३. यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः। तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।।
–यजुः४०.६.७

७४. (क) सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने।
येन संगच्छा उप मा स शिक्षाच्चारु वदानि पितरः संगतेषु।। –अथर्ववेदः ७.१२.१

(ख) ये ते के च सभासदास्ते सन्तु सुवचस:। –अथर्ववेद: ७.१२.३

७५. विराड् वा इदमग्र आसीत्। तस्या जाताया: सर्वमबिभेदियमेवेदं भविष्यतीति। सोदक्रामत्....
–अथर्ववेद: ८.१०.१२

७६.(क) ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्त: शिशिरो वसन्त:।
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम्।। –अथर्ववेद: १२.१.४५

६६. विद्म ते समे नाम नरिष्ठा नाम वा असि। ये ते के च सभासदस्ते मे सन्तु सुवाचस:।।
–अथर्व०७.१२.२

६७. सभ्य! सभां मे पाहि , ये च सभ्या: सभासदा:। त्वयेद्गा: पुरुहूत विश्वमायुर्व्यश्नवम्।।–अथर्ववेद:

६८. यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरत: सह। तं लोकं पुण्यं प्रज्ञेषं यत्र देवा: सहाग्निना।।
–यजु०२०.२५

६९. शुनं न फाला वि कृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहै:।
शुनं पर्जन्यो मधुना पयोभि: शुनासीरा शुनमस्मासु धत्तम्।। –ऋ०४.५७.८, अथर्व०३.१७.१३

७०. मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे।–यजु०३६.१८

७१. सहृदयं सांमनस्यमविद्वेषं कृणोमि व:। अन्या अन्यमभि हर्यत वत्सं जातमिवाघन्या।।
–अथर्व०३.३०.१

७२. प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।
प्रियं सर्वस्व पश्यत उत शुद्र उतार्ये।। –अथर्व०१९.६२.१

—निदेशक:
डॉ.गो.गि.ला.शा.प्राच्यविद्याप्रतिष्ठानम्,
दिल्लीसर्वकार:

# अष्टाङ्ग मूलाधार:—यमनियमा:

**—डॉ० राजेश बतरा**

योगस्य स्थानं भारतीय साहित्य-संस्कृति-अध्यात्म-विज्ञान-दर्शनदृष्ट्या विशेषतया महत्त्व-पूर्णमस्ति। योग: एक: आस्तिक-दर्शनम्, योगस्य भारतीयदर्शनसाहित्ये एकम् उच्चतमम् स्थानम् अस्त्येव, अपितु अस्य विश्वदर्शनसाहित्ये अन्यतमम् एवं विशिष्टं योगदानं विद्यते। योगस्य वास्तविकस्वरूपस्य उपादेयताया: व्याख्याया: आवश्यकता विद्यते। योग: मुख्यत: ब्रह्मत्वसिद्धे: तत्त्वानुभूते:, मनोनिर्वाणस्य, शाश्वतशान्ते: आनन्दानुभूतेश्चोपाय: अस्त्येव। भौतिकस्वास्थ्यलाभस्तथा रोगप्रतिषेध: योगस्य प्राथमिकोद्देश्यं नास्ति, यद्यपि ऐषु क्षेत्रेषु अपि अस्योपादेयता सिद्ध्यत्येव। विविध योगसम्प्रदायेषु साधना-क्रमे विविधप्रकारक: व्यवस्था स्थापित:। एतेषु अष्टांगिक: योगमार्ग: योगशास्त्रीयपरम्परायां विशिष्टं स्थानं भजते। अत: अस्य परिचयमत्र प्रासांगिकं वर्तते।

**अष्टांगिक: योगमार्ग:—**

ब्रह्मत्वसिद्धि: अथवाऽऽत्मसिद्धे: मार्गस्य विभिन्नावरोधानां निवारणाय सर्वेषु योगसम्प्रदायेषु कानिचित् अनुशासनानि व्यवस्थाश्च प्ररूपिता:। यस्मिन् क्रमश: प्राथमिकस्तरे नित्यनैमित्तिककर्मणा पवित्रताऽनुसरणेन शारीरिकसंवेगानां व्याधेश्च नियन्त्रणं तथा तेन सम्पूर्णमानसिककालुष्यानामुपरि विजयं प्राप्यते। ततो व्याधित: समाधिपर्यन्तम् मार्गानुसरणं कृत्वा निश्चलचित्तावस्थायां ऋतम्भरा-प्रज्ञाया: अभ्युदयं कृत्वा आत्मासाक्षात्कारपर्यन्तम् करणीयान् कार्यान् विभिन्नभागेषु विभज्यते, एषां सर्वेषां कर्त्तव्यानामनुसरणेन योगरूपलक्ष्यस्य प्राप्ति: सिद्धि: वा भवति। अत: एतानि योगाङ्गानीति ज्ञायते।

महर्षिपतञ्जलिना प्रवर्तित: एवं महर्षिदत्तात्रेयेण प्रचारितो योग:[१] (यं राजयोगोऽपि कथ्यते) साधनारूपे मुख्यरूपेण अष्टाङ्गानि प्रचलितानि सन्ति—

१. यम:, २. नियम:, ३. आसनम्, ४. प्राणायाम:, ५. प्रत्याहार:, ६. धारणा, ७. ध्यानम्, ८. समाधिश्च।

| | |
|---|---|
| यम नियमश्च | —Ethical Practices |
| आसनं प्राणायाम: | —Physical Practices |
| प्रत्याहार: | —Sensorial Practices |
| धारणा ध्यानं समाधि: | —Meditative Practices |

योगस्य पूर्णसाधनार्थमेतेषां अष्टाङ्गानां क्रमश: अभ्यास: आवश्यकोऽस्ति। क्रमश: प्रत्येकेऽङ्गे पूर्णाधिकारे जाते अग्रिमे योगाङ्गे प्रवृतिर्विधेया। एतेस्वष्टाङ्गेषु प्रथम द्वौ यमनियमश्च प्रधानता आचारसम्बन्धी अभ्यासौ स्त:। नियमस्य सम्बन्ध: यतोहि व्यक्तिगत जीवनेऽधिकोऽस्ति अत: नियमापेक्षया यमस्य प्राथमिकता स्यात्। मनुस्मृतौ यमनियमञ्च निरन्तरं पालनयोग्यकर्तव्यरूपेण स्वीकृतवन्तौ। तत्र एवमपि प्रतिपादितं यत् यमस्य पालनं विना मनुष्यस्य पतनं भवति।[२]

**१. यमः—**

महर्षिपतञ्जलिः एकस्मिन् सूत्रे अष्टाङ्गयोगमुक्त्वा ततः सूत्रेषु यमनियमयोरुल्लेखः कृतवान् तथा इमौ सर्वसाधनानामाधारौ इत्युक्तम्—

**यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि।**[३]

**अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः।**[४]

**शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः।**[५]

महर्षिपतञ्जलेरनुसारेण अहिंसा, सत्यम्, अस्तेय, ब्रह्मचर्यम्, अपरिग्रहश्चैते पञ्च यमाः कथ्यन्ते। सर्वे योगसम्प्रदायाः पञ्चयमाः मन्यन्ते। तथापि केषुचित् योगग्रन्थेषु पञ्चस्थाने दशयमाः निगदिताः। तद्यथा—

**अहिंसासत्यमस्तेयं ब्रह्मचर्यक्षमा धृतिः।**
**दयाऽऽर्जवं मितहारः शौचं चैव यमा दश॥**[६]

यमः निषेधात्मकः धर्मोऽस्ति। मनसा, वाचा, कर्मणा वा कञ्चिदपि प्राणिनं कष्टं, दुखं वा न दातव्यम् अर्थात् न हिंसा अहिंसेति। स्मृतिरपि कथयति—'अहिंसा परमो धर्मः' योगसूत्रस्य व्याख्याकारः व्यासः हिंसायाः एकाशीतिः संख्यकः भेदः प्रोक्तः।[७] मनुष्यमात्रेणैव समेषां प्राणीनां कृते हिंसा परित्यज्य शास्त्रसम्मतस्य धर्मस्य पालनं कर्तव्यम्। महर्षिदत्तात्रेयः अहिंसायाः महत्त्वम् अनेन प्रकारेण प्रतिपादयति—

**'अहिंसा नियमेष्वेका मुख्या भवति नापरे।'**[८]

सत्यस्यार्थोऽस्ति यथार्थः अर्थात् मनसा, वाचा कर्मणा च एकैवाचरणं व्यवहारश्च। मुण्डकोपनिषदि उक्तं 'सत्यमेव जयते नानृतम्।'[९] बृहदारण्यकोपनिषद्यपि सत्यस्य महत्त्वं प्रतिपादितं, तत्रैव भगवद्गीतायाम् इमां वाण्याः सर्वोपरि तपः प्रोक्तः।[१०] अस्तेयस्य तात्पर्यमस्ति यत् अन्यस्य धनं, वस्तु विचारो वा स्वहिताय प्रयोगस्य प्रवृत्ते विरतिः। अस्तेयेन व्यक्तिगतचित्तशुद्धिना सह सामाजिकदुखमपि न्यूनतां गच्छति। महर्षिपतञ्जलिरनुसारं अस्तेयस्य पालनेन समस्तानि रत्नादिनि सम्पत्तीनां च प्राप्तिः साधकेभ्यः अनायासं भवति।[११] ब्रह्मचर्यं स्वधर्मविरतेः बोधको भवति। गरुड़पुराणे ब्रह्मचर्यं इत्थं परिभाषितम्—

**कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा।**
**सर्वत्र मैथुनत्यागो ब्रह्मचर्य प्रचक्षते॥**[१२]

नैतत् केवलं मैथुनकर्मविरति मात्रमेव। परन्तु मैथुनविरतिः ब्रह्मचर्यस्य महत्त्वपूर्णमङ्गमस्ति। यतो अयं साधकस्य मनसः वा शरीरस्य शुद्धिना सह तं मानसिक-शारीरिकदृष्ट्या अपि सबलीकरोति। ततः सः साधनाबलेन कुशलतया अग्रेसरो भवत्विति। साधनापरम्परायां सामान्यतया ब्रह्मचर्यपदेन अर्थत्रयाः स्वीक्रियन्ते—१. उपस्थेन्द्रियस्य संयमः, २. अष्टविधमैथुनानां पूर्णत्यागः, ३. पितरौ, आचार्य (गुरुः), मातुलः श्वसुरश्चैतेषां पञ्चगुरूणां सेवा। एषु प्रथमः मुख्यः द्वितीयः तस्य पूरकोच्यते। एषु उपस्थेन्द्रियस्य संयमः कठिनतरो भवति। ब्रह्मचर्यशब्दस्य यौगिकार्थः ब्रह्मणि चर्या अर्थात् विचरणम्। मम गुरवः परमसन्तेन ठाकरसिंहेनोक्तं यत् ब्रह्मचर्यमर्थात्—

'तदेव आचरणं यत् ब्रह्मप्राप्तौ सहायक एव भवति।' अत्र योगाङ्गरूपेण यमः ब्रह्मप्राप्तेः कैवल्यप्राप्तेः वा साधनरूपेण वर्णितमस्ति। अत्र गुरोः सेवा गुरोः कृपा अत्यन्तं महत्त्वपूर्णमस्ति। यतो एनं विना ब्रह्मत्वसिद्धिर्न सम्भवति।[१३] विषयानां चिन्तनं तथा ब्रह्मणि निरन्तरविचरणं परस्परविपरीतक्रिये स्तः। ब्रह्मचर्येण चित्तवृत्तीनां निरोधं विना सिद्धेः प्रयासः निरर्थक एव। लोभ-मोह-कामाः ब्रह्मचर्यनाशस्य हेतवः सन्ति। अतः हिंसामिव अब्रह्मचर्यस्यापि एकाशीति भेदाः भवन्त्येव। स्मृतिषु उपनिषत्सु च गृहस्थानां कृते अपि पुत्रकामनयैव अब्रह्मचर्यं सीमितं वा नियमितमस्ति।[१४] ब्रह्मचर्यं गृहस्थानां कृते अनिवार्यं प्रोक्तम्।

ब्रह्मचर्यसाधनायाः लाभोऽपि अनन्ताः सन्ति। ब्रह्मचर्यसाधनाक्रमे साधकः कामक्रोधलोभ-मोहानामुपरि विजयं प्राप्तये यतते, फलतः मनोनिग्रहः अनायासं भवत्येव। साधकः इन्द्रियेषु पूर्णविजयं प्राप्नोति।

परिग्रहस्याभावो हि अपरिग्रहोऽस्ति, अर्थात् अनासक्तिपूर्वकं धनसम्पत्तीनां भोगसामग्रीनां च संचयः परिग्रहोऽस्ति। अस्याभावोऽपरिग्रहः इति। अन्यशब्देषु समस्तभोगपदार्थाणां प्रति अनासक्तिभावो एव अपरिग्रहः। योगसाधनायारन्तिमोद्देश्यं खलु ब्रह्मत्वसिद्धिः कथ्यते। अतः साधकः परिग्रहं त्यक्त्वा अपरिग्रहं प्रति प्रवृत्तः भूयात्। ऐते पञ्चयमाः जातिदेशकालनिमित्तानां सीमारहिताः सन्तः सार्वभौमे सति महाव्रतत्वं यान्ति।[१५] सर्वे धर्मसम्प्रदायाः अस्मिन् रूपेणैव अन्यस्मिन् स्वरूपे वा स्वीकुर्वन्ति। बौद्धैः एते पञ्चशीलाः कथ्यन्ते।

**२. नियमाः—**

अयमपरो योगाङ्गोऽस्ति। पञ्च नियमाः—

**शौच-संतोष-तपः-स्वाध्यायेश्वरप्रणिधानानि नियमाः।**[१६]

शौचः, संतोषः तपः स्वाध्यायः ईश्वरप्रणिधानञ्च इमे पञ्चनियमाः सन्ति। शौचापेक्षया संतोषस्य साधना सूक्ष्माऽस्ति। काचित् कठिनापि च। अनेन प्रकारेण संतोषाऽपेक्षया तपसः तपापेक्षया स्वाध्यायस्य स्वाध्यायाऽपेक्षया ईश्वरप्रणिधानस्य साधना उच्चतमा विद्यते। अतएव नियमेषु अन्तिमस्त्रयः तपस्वाध्योश्वरप्रणिधानानि क्रियायोगः (कर्मयोगः) कथ्यते।[१७] शौचस्य तात्पर्यमस्ति जीवनस्य शारीरिकस्य मानसिकस्य वा क्रियाकलापस्य प्रत्येकक्षेत्रे शुद्धतायाः अभ्यासः। उभयप्रकारस्य शुद्ध्यर्थं द्वे कार्ये आवश्यके स्तः १. मलापहरणम्, २. मलोत्पन्नेऽवरोधः अस्यार्थं सततं सावधानेन स्थित्वा प्रयत्नो विधेयः।

शरीरशुद्ध्यर्थं मृत्तिका, जलफेनकम् वा अन्य मलापहारकसाधनानां प्रयोगं कृत्वा बाह्यशरीरं तथा नेति-धौति-कुञ्जल-बस्ति-शंखप्रक्षालन-नौलि-त्राटक-कपालभात्यादि-क्रियाभिः शरीरस्यान्तरिकभागं शुद्धं क्रियते। यद्यपि षट्कर्म क्रियाणां विषये पातञ्जलः मौनोऽस्ति[१८] तथापि महर्षिपतञ्जलिः बाह्याभ्यन्तरशुच्यां बलं ददाति। महामुद्रा-योगमुद्रादि-क्रियाभिः नाडीनां शुद्धिर्भवति। शरीरेऽशुद्धतोत्पतिमवरोधुं शुद्धसात्त्विकाहारस्य ग्रहणं कर्त्तव्यम्। योगसाधनायां सफलतायै अथवाऽऽध्यात्मिकसफलतार्थम् अयमत्यन्तावश्यको विद्यते। आन्तरकं वा मानसिकं शुद्धिमवाप्तुं राग-द्वेष-काम-क्रोध-लोभ-मोहाहंकारादीनां मनोविकारणां दूरीकरणस्य प्रयत्नः विधेयः। सुखीजनैः सह मित्रता, दुखीजनैः सह करुणा, सज्जनेन समं मुदिता च दुर्जनेन सह

उपेक्षाभावेन मनसः शुद्धिर्भवति।[१९]

शौचानन्तरम् द्वितीयः नियमोऽस्ति। कर्मफलेन च प्रारब्धोपार्जितफलेन सह यत् प्राप्यते तेन यादृशी वा स्थितिर्भवतु तत्र यः सुखी भूत्वा नान्यस्य कामनां कृत्वा यः तिष्ठति तदेव संतोषः कथ्यते। सुखप्राप्तेः सर्वोत्तमोपायः कामनानां तृष्णानां च विनाशः एवास्ति। अतः तृष्णाक्षयम् अर्थात् सन्तोषः सर्वोत्तमसुखं मन्यते।[२०] सन्तोषः अनुभूतेर्विषयोऽस्ति। अस्मिन् या आत्मतृप्तिः प्राप्यते तस्य समानता न केनापि सुखेन कर्तुं शक्यते।

तपः तृतीयः नियमोऽस्ति, तथा क्रियायोगस्य प्रथमोऽङ्ग एवास्ति। स्व-वर्ण-आश्रम-परिस्थिति-योग्यतानुसारं स्वधर्मपालनं तस्य पालने चाधिकाधिकमानसिकं शारीरिकं वा कष्टं सहर्षं स्वीकरणमेवेह तपः। साम्प्रतिके परिवेशे सर्वेषामानावश्यकसुखानां त्यागः एव तपः इति। व्रतोपवासादयोऽपि  तपःसंज्ञकाः सन्ति। पतञ्जलिना नियमेषु तपः मध्ये स्थापितम्। यतो हि तपः तपस्या वा योगसाधनायाः क्रमे अत्यधिकं महत्त्वपूर्णमस्ति।

यथा लौह-सुवर्ण-रजतादिस्थूलभौतिकधातूनां शुद्धिः तदा जायते यदा तेषामग्नौ उत्तमपाकः जायते। तथैव चित्ते अनादिकालाद् विद्यमानाः अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशरूपक्लेशानां प्रभावाद् विषयवासनानां तथा जन्मजन्मान्तरकर्मवासनानां च विनाशः तपः विना न भवितुं शक्नोति। तपसैव एतेषां समस्तकर्मवासनानां तथाविषयाकर्षणजनितक्लेशानां विनाशस्य उपायमात्रमस्ति।[२१] श्रीमद्भगवद्गीतायामपि तपस्त्रिधा शारीरिकं, वाचिकं मानसिकञ्च मत्वा अस्य महत्त्वं प्रतिपादितम्[२२]—

**(क) देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्**
**ब्रह्मचर्यमहिंसा च शरीरं तप उच्यते॥**

**(ख) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥**

**(ग) मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्ये तत्तपो मानसमुच्यते॥**

कर्त्तव्याकर्तव्यज्ञानाय वेदादिशास्त्राणां तथा महापुरुषाणामुक्तीनां पठनपाठनेन चेश्वरस्य ॐकारस्य उच्चारणं वा मन्त्रविशेषानां जपः खलु 'स्वाध्यायः' कथ्यते। आङ्गलभाषायां Self Analyse अर्थेऽपि अस्य प्रयोगं कर्त्तुं शक्यते। अर्थात् स्वजीवनस्याध्ययनमपि स्वाध्यायान्तर्गतमेव मन्यते। ईश्वरे शरणापन्नं नाम ईश्वरप्रणिधान इति। ईश्वरस्य नामरूपादेः श्रवणं, कीर्तनं मननञ्च समस्तकर्म ईश्वरे समर्प्य तस्यानुरूपं कार्यकरणं खलु सर्वमीश्वरप्रणिधानमस्ति। एतद् गीतोक्तं भक्तियोगसममेवास्ति।[२३] ईशोपनिषद्यपि उक्तमस्ति—'ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।' अर्थात् यः किञ्चिदपि दृश्यमानोऽदृश्यमानो जडचेतनमयं जगदस्ति सर्वं खलु 'ईश्वर' एव। अतः तं प्रति समर्पणस्य भावः भवितव्यम्। अनेन प्रकारेण पञ्चानां यमानां सदृशः पंचनियमाः साधनामार्गस्यात्यन्तमहत्त्वपूर्णानि सोपानानि सन्ति। इमे द्वे अष्टांगिक योगस्य मूलाधारः वर्तन्ते नास्ति अस्मिन् विषये कोऽपि संशयलेशः इति।

**सन्दर्भग्रन्थ—**


१. वाचस्पति विज्ञानभिक्षुरश्चानुसारेण महर्षिपतञ्जलि योगस्य प्रवर्तक: नासीत् अपितु एक: संग्रहकर्त्ता: आसीत्—'भारतीयदर्शन का इतिहास', भाग-१, एस.एन. दास गुप्ता, पृष्ठ २३७

२. मनुस्मृति:, ४.२०४ ३. योगसूत्र, २.२९

४. तत्रैव, २.३० ५. तत्रैव, २.३२

६. हठयोगप्रदीपिका, १.१७

७. विस्तृताध्ययन हेतु द्रष्टव्य डॉ० ब्रह्ममित्र अवस्थी 'प्रणव' प्रणीत: 'पातञ्जलयोगशास्त्र—एक अध्ययन' ग्रन्थस्य, पृष्ठ १०३ व १०६

८. दत्तात्रेय योग, ६५

९. मुण्डकोपनिषद्, ३.१.६

१०. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप: उच्यते॥ —गीता, १७.१५

११. अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्। —योगसूत्र २.३७

१२. गरुड़पुराण आचार:, २३८.६

१३. अखण्डमण्डलाकारं व्याप्तं येन चराऽचरं।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नम:॥

१४. प्रश्नोपनिषद् १.१३, मनुस्मृति: ३.५

१५. जातिदेशकालसमयानवच्छिन्ना: सार्वभौमामहाव्रतम्। —योगसूत्र, २.३१

१६. योगसूत्र, २.३२

१७. तप: स्वाध्यायेश्वर प्रणिधानानि क्रियायोग:। —योगसूत्र, २.१

१८. धर्मशास्त्र का इतिहास, भाग-५, पृष्ठ २७६

१९. मैत्रीकरुणामुदितोपेक्षाणां सुखद:खपुण्यापुण्यविषयाणां भावनात: चित्तप्रसादनम्। योगसूत्र, १.३३

२०. (क) सन्तोषो वै स्वर्गतम: सन्तोष: परमं सुखम्।
तुष्टेर्न किञ्चित्परत: सुसम्यक् परितिष्ठति॥ —महा० शान्तिपर्व २१२
(ख) सन्तोषादनुत्तमसुखलाभ:। —योगसूत्र, २.४२

२१. अनादिक्लेशकर्मवासनाचित्रा प्रत्युपस्थित विषयजाला चाशुद्धि: नान्तरेण तप: संभेदमापद्यते।
—योगभाष्य २.१

२२. श्रीमद्भगवद्गीता (क) १७.१४, (ख) १७.१५, (ग) १७.१६

२३. तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्। १८.६२


—निदेशक:, वैलनेस केयर, योग-प्राकृतिक
चिकित्सा केन्द्र:, अशोक विहार:,
नवदेहली-११००५२

# फलाभिसन्धिभेदादवयवनामपि क्रियात्वम्

**—डॉ० रामसलाहीद्विवेदी**

निखिलोऽयं संसार: शब्दात्मक:। शब्दानां व्युत्पत्तिश्च क्रियाधीना वर्तते। अत एव शब्दानामवबोधनञ्च क्रिययैव सम्भवति। यथा गच्छतीति गौ:, स्वकर्मणि घटते इति घट:, मन्यते जनैर्महर्घत्वेनेति मणि:, नॄन् पृणाति ध्वनिनेति नुपुरमिति। यथा चाम्बाकर्त्रीकारोऽपि प्रतिपादयति **'संज्ञाशब्दानामपि गोघटादीनां मणिनुपुरादीनां रथवरुथादीनाञ्च व्युत्पत्तिकर्मणि क्रियाया उपयोग:।'**[१] यया क्रियया शब्दानां व्युत्पत्तिलभ्योऽर्थ: निष्पद्यते सा च क्रिया का? अस्य प्रश्नस्य जिज्ञासायामुच्यते यत् 'साध्यत्वेनाभिधीयमान: व्यापाराणां क्रमविशिष्ट: सङ्घात: क्रिया' यथा च आचार्य: भर्तृहरि: वाक्यपदीयात्मके ग्रन्थे परिभाषते—

**यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।**
**आश्रितक्रमरूपत्वात् तत् क्रियेत्यभिधीयते॥**[२]

अयम्भाव: यत् सिद्धमसिद्धं वा यावत् साध्यत्वेन क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपेणाभिधीयते। तत्सर्वं क्रियेतिपदेनोच्यते।[३] इदं तु क्रियाया: पारिभाषिकं स्वरूपम्। अत्र क्रियाशब्दस्यैका अपरा अपि व्युत्पत्ति: परिलक्ष्यते, सा च क्रियतेऽवयवानां क्रमेणोत्पत्या या सा क्रिया। क्रियाशब्दस्य व्युत्पत्तिरियमन्वर्थतामधिगच्छति। अनेनेदमायाति यत् क्रियेति पदं द्विविधं प्रसिद्धम् एकं यौगिकं, द्वितीयं रूढम्। यथा च स्वप्रणीताख्ये भूषणसारे आचार्य: कौण्डभट्टोऽपि प्रतिपादयति। 'भ्वादिसूत्रादिषु प्राय: क्रियाशब्देन भावनाव्यपदेशात् तत्र तस्य साङ्केतिकीशक्ति: फलांशे क्वाचित्क: क्रियते इति यौगिक: प्रयोग:। तथा च संज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन बलवत्वात् भावनान्वय एव साधुता लभ्यते।[४] अत्र वाक्यपदीयकार: **'योगाद् रूढिर्बलीयसी'** इति नियमेन 'भूवादयो धातव:'[५] इत्यादौ साहचर्यनियमाच्च प्रसूतक्रियाशब्द: व्यापारबोधक: तस्यैव ग्रहणं स्वीकरोति। व्यापारस्तु भावनाऽभिधासाध्यत्वेनाभिधीयमानाक्रिया। इयञ्च क्रिया भावना उत्पादना रूपादिषु प्रसिद्धा यथा भूषणकारोऽपि प्रतिपादयति—

**व्यापारो भावना सैवोत्पादना सैव च क्रिया।**
**कृञोऽकर्मकताऽऽपत्तेर्नहि यत्नोऽर्थ: इष्यते॥**[६]

एतेनेदं सिद्धयति यत् व्यापारस्य भावना उत्पादना क्रियेत्यादिशब्दानां पर्यायवाचकत्वमेव वैयाकरणानां निकाये राद्धान्तत्त्वेनाङ्गीक्रियते। अयमेव भावनाभिध: क्रियाशब्द: सर्वासां साध्यक्रियाणां वाचकोऽस्ति।

साम्प्रतं प्रश्नोऽयमुत्पद्यते यत् या च क्रिया क्रमश: विविधै: व्यापारै: पौर्वापर्यक्रमे उपनिबद्धास्ति तेषां पूर्वापरीभूतानां क्षणिकस्थितानां विनश्वराणां व्यापाराणां एककालावच्छेदेन प्रवर्तमानत्वाभावात् कथमित्येकागमनक्रिया पठनक्रियेति व्यवहारो जायते। प्रश्नस्योत्तरमाचार्य एवं संसाधयति—

**गुणभूतैरवयवै: समूह: क्रमजन्मनाम्।**
**बुद्ध्या प्रकल्पिताभेद: क्रियेति व्यपदिश्यते।**[७]

अत्रायं भाव: वर्तते यत् गुणत्वमधिगतै: स्वावयवै उपलक्षित: क्रमेण जायमानानां व्यापाराणां

समूहः सङ्कलनात्मिकयाभेदबुद्ध्या क्रियात्वमनुप्राप्याभिधीयते। यद्यपि समूहसमूहिनोऽभेद-सम्बन्धस्तथापि विनश्वराणां व्यापाराणामयमेकः समूहः क्रियेति परिकल्पना आरोपितैक्य-मुपपाद्याभेदन स्वीक्रियते। क्रमेण जायमानाः इमे सर्वेऽवान्तरव्यापाराः फलैक्यस्य निष्पादकत्वेन प्रवर्तन्ते। अत एवावयवभूता इमेऽवान्तरव्यापाराः मुख्यक्रियां प्रति गौणतां भजन्ते। व्यापारास्तु विनाशशीला अत एव क्रमशः शब्देन तु निगद्यन्ते परन्त्वेककालावच्छेदेन इमे सर्वेऽवान्तरव्यापाराः एकेनैव शब्देन क्रमशः समकालमेव न निगद्यन्ते प्राधान्यप्रयुक्तस्य शब्दभेदप्रयोजकत्वस्याभावात्। अत एव समुदायस्वभावैका क्रिया परिकल्प्यते। तस्याश्च क्रियाया अवयवाधारितः क्रमः पौर्वापर्यञ्च कथ्यते। क्रमविशिष्टः व्यापाराणां समूहः तन्निष्ठैकत्वञ्च क्रियास्वाध्यारोप्यते न तु वस्तुभूतम्। उत्पत्तिसमनन्तरमेव विनष्टानां व्यापाराणां समुदायाभावात्। अत एव पचतीत्यत्राधिश्रयणादारभ्याधः श्रयणपर्यन्तं व्यापाराणां यो समूहः सोऽप्यभेदबुद्धिकल्पनयैकत्वेन परिकल्प्यारोप्यते न तु वस्तुभूतम्।[८] तथापि क्रमशः जायमानान् इमान् सर्वान् व्यापारान् समुदायेऽध्यारोप्य समुदायभूतायाः प्रधानक्रियायाः कल्पना क्रियते। यतोहि समुदायादेव फलोत्पत्तिर्जायते न तु अवयवेभ्यः यथोक्तञ्च हेलाराजीये **'समुदायादेव हि फलं निष्पद्यते न हि विचटनमात्रात्,[९] अधिश्रयणादिवैयर्थ्यप्रसङ्गात्।'[१०]**

तात्पर्यमिदमस्ति यत् यद्यधिश्रयणेनाधस्सन्तापेन दर्विविघटनेनैकेनैव व्यापारेण फलोत्पत्तिस्स्यात्। तर्हि पचतीत्यत्र फलनिष्पाद्यमानत्वाभावात् घटकतया प्रविष्टानामन्येषां व्यापाराणां वैयर्थ्यं सङ्गच्छत एव। यदि फलोत्पत्तेः अव्यवहितोत्तरप्राक्काले विद्यमानस्य व्यापारस्य कार्यभूतो विशेष इति मत्वा आनन्तर्यत्वात् प्रकृष्टोपकारकत्वेनासौ व्यापार एव साधनतामुपैति। इदमपि युक्तन्न। यतोहि पच्धातो अधिश्रयणादारभ्याधःश्रयणपर्यन्तं यावन्तोऽप्यर्थाः प्रतीयन्ते तावन्तः सर्वेऽप्यर्थाः फलविशेषसम्पादकत्वेन फलैक्यात् स्वरूपतः बहुत्वेऽपि अभेदेतिबुद्ध्या एकत्वेनाध्यवसीयन्ते क्रियेति पदेनोच्यन्ते च।

अत एव फलनिष्पत्तौ न त्वेकस्यैव व्यापारस्य साधनत्वं विजानीयं नापि प्रकृष्टोपकारक-त्वादव्यवहितोत्तरस्यैव। एवं स्वीकृते तु पचतीत्यत्र घटकतया प्रविष्टानां व्यापाराणां वैयर्थ्यं स्पष्टमेव। एतेनेदमायाति यदभेदेन परिकल्पितः व्यापारणां क्रमविशिष्टः सङ्घातः क्रियेति पदेनाभिधीयते।[११] यदि समुदायः क्रिया तर्हि पचतीत्यत्राधिश्रयणाद्यवयवानां क्रियात्वं न स्यात्।[१२] अस्यां जिज्ञासामुच्यते यत् गुणभूतक्रमजन्मना व्यापाराणामभेदेन परिकल्पितः समूहोऽपि फलमभि-सन्धाय प्रत्यवयवमध्यारोप्यते। ततोऽवयवेऽपि क्रियात्वमुत्पद्यते। तेनावयवेऽपि कालभेदप्रयुक्तानि कार्याणि भवन्ति। अत एव अधिश्रयतीत्यभिप्रायेण पचतीत्यस्य प्रयोगो यदा भवति तदाधिश्रयणे रूपे आद्ये व्यापारे एवाधिश्रयणावयवारब्धः समस्तोऽधःश्रयणान्तःव्यापाराणां समूहः तत्रैवाध्यारोप्यते।[१३] किन्तु फलाभिसन्धिः पृथक् पृथक् भवति। यथा स्थाली पचति, दर्वी पचति, काष्ठानि पचन्ति, इत्यत्राधः सन्तापनं, दर्विविघटनं फूत्कारञ्चैव प्रधानफलमादाय पचति पचन्त्यादयः प्रयोगाः प्रवर्तन्ते। एतेनेदमायाति यत् अधिश्रयणादारभ्याधःश्रयणपर्यन्तं यावदपि व्यापाराणामभेदेन परिकल्पितः समुदायः वर्तते तत्सर्वमधिश्रयणादि प्रत्यवयेष्वध्यारोप्यते। अधिश्रयणादीनामवयवा-नामधिश्रयणादिकमेवफलमादाय पचतीति वर्तमानकालस्य प्रयोगो भवति, तस्यातीतत्वादपाक्षीदादयः भूतकालिकाः प्रयोगाः सङ्गच्छन्ते। अधिश्रयणस्याव्यवहितोत्तरकाले जन्यजनकभावेन भाव्यमानो समस्तोऽधःश्रयणान्तः यो क्रियाकलापः यं च मुख्यं फलं सञ्जनयिष्यति। तच्च फलमादाय

पक्ष्यत्यादयः भविष्यत्कालिकाः प्रयोगाः सम्पत्स्यन्ते। तदेवोच्यते हेलाराजीये "**अधिश्रयणारम्भ एव फलाभिसन्धेः समस्तक्रियाकलापस्तत्रैवाध्यस्यते**"[१४] यथोक्तञ्च वाक्यपदीयेऽपि—

**एकदेशे समूहे वा व्यापाराणां पचादयः।**

**स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः॥**[१५]

अत्रावयवे समुदायारोपस्तु पूर्वापरीभूतावयवकत्वेन वर्तते। नापि समुदायबुद्ध्या नाप्यवयवबुद्ध्या अयञ्चायञ्चेति समुच्चयेन। तेन प्रत्यवयवं क्रियात्वारोपस्योत्तरक्षणेऽपि साध्यता आकाङ्क्षा च नैरन्तर्येणावतिष्ठते न विहन्यत इत्यर्थः। एवं क्रियावयवानामपि क्रियात्वमुपपद्यते। यथोक्तञ्च वाक्यपदीये—

**समूहः स तथाभूतः प्रतिभेदं समूहिषु।**

**समाप्यते ततो भेदे कालभेदस्य सम्भवः॥**[१६]

सम्प्रदानसूत्रस्थभाष्यप्रामाण्यानुरोधेन तु क्रियाया अवयवशः प्रत्यक्षत्वं तु सिद्धमेव।[१७] परन्तु भ्वादिसूत्रस्थभाष्ये कथमिदं ब्रूते भाष्यकारः यत् '**क्रियानामेयमत्यन्तापरिदृष्टा न शक्या पिण्डीभूता निदर्शयितुं, यथा गर्भो निर्लुठितः**' भाष्यमिदं बुद्धिपरिकल्पितं समुदायमेव। क्रियेत्यभिप्रायेणोक्तम्। अत एवैन्द्रियेभ्य अनुमानगम्येयं क्रिया। अत्र कर्मणा यमभिप्रैतीति सूत्रस्थम-वयवशः क्रियायाः प्रत्यक्षत्वमूलकं भाष्यप्रामाण्यमादाय ये वदन्ति यत् क्रियानामेयमत्यन्तेति भ्वादिसूत्रस्थं भाष्यं न सङ्गमिष्यते। मन्मते तु ते भ्वादिसूत्रस्थस्य भाष्यस्य स्वारस्यं नैव विदन्ति। यतोहि तत्रत्या क्रिया सदसतां व्यापाराणां संघातत्वेनावयवशः एककालावच्छेदेनेन्द्रियागोचरा बुद्धिप्रतीतविषया फलरूपतयानुमेया च। वक्तुं शक्यते यत् तत्रत्यः पौर्वापर्यक्रमः अध्यारोपितसमूहस्य द्रष्टुमेव न शक्यते तस्यानुमेयत्वाच्च। **अत्र भाष्यकारः का पुनः क्रिया? ईहा। का पुनरीहा? चेष्टा। का पुनश्चेष्टा। व्यापारः सर्वथा भवान् शब्दानैव शब्दानाचष्टे किं चिदर्थजातं निदर्शयत्येवं क्रियेति। क्रियानामेयमत्यन्तामपरिदृष्टा। अशक्या क्रिया पिण्डीभूता निदर्शयितुम्। यथा गर्भो निर्लुठितः।**[१८] यथोक्तञ्च हेलाराजीयेऽपि '**भागशः प्रत्यक्षत्वाच्च न शक्या पिण्डीभूता पांसुराशिवत् क्रिया निदर्शयितुम्।**' व्याख्यानमिदमुत्तरक्षणेऽसतां व्यापाराणामिन्द्रियविषयायोगाच्च सङ्गच्छत एव। यथोक्तञ्चाम्बाकर्त्र्याम् 'क्रमेण जायमानत्वात् क्षणिकत्वाच्च सदसतामुत्पत्तिक्षणे सतामुत्तरक्षणे चासतां तेषामध्यारोपितसमूहभावानामवयवाना-मात्मानः वर्तमानविषयकैश्चुक्षुरादिभिः सम्बन्धं न यान्ति। क्षणिकानां व्यापाराणामुत्तरक्षणेऽ-वर्तमानत्वेनेन्द्रियार्थसन्निकर्षायोगात्'[१९] एवमवयवानां प्रत्यक्षत्वं तु उत्पद्यत एव। अवयवानां प्रत्यक्षत्वेनावयवक्रियाणामपिप्रत्यक्षता स्यात्, इदन्तु युक्तं न। यतोहि विक्लित्योत्पादिकायाः प्रधानपचादिक्रियायाः यथा उदकासेचनादय अवयवाः वर्तन्ते। तथैवोदकासेनादीनामवयवक्रियाणा-मपि स्वावयवाः भवन्ति। अत एवोदकासेचनाधिश्रयणफूत्कारादय अवयवा अपिक्रियात्वेना-वयववन्तस्सन्ति। तेनैते मुख्यक्रियामिव क्रियात्वमनुप्राप्य प्रत्यक्षभावमतिवर्तन्ते यथा च प्रतिपादयति हेलाराजोऽपि '**अधिश्रयणादीनामपि संस्कारकाः स्वावयवा विद्यन्त इति तेऽपि पूर्वापरीभूताः क्रमवन्त एव क्रियाविशेषाः प्रत्यक्षमावमतिवर्तन्त एव। तथाहि स्वावयवपरिकल्पनया पूर्वापरीभूतसमुदायात्मका एवैते**'[२०] अत एवावयवक्रियाणां तु मुख्यक्रियामिवाप्रत्यक्षतैव न्याय्या।

अत्र भावमेवं विजानीयं यत् यथा मुख्यपाकक्रिया सङ्घातत्वेनेन्द्रियातीततया अप्रत्यक्षाफलानुमेया चास्ति तथैव स्वावयवपरिकल्पनया एते अधिश्रयणादयः व्यापारा अपि। अत एवैतेऽवयवभूत–व्यापाराः पूर्वापरीभूताः समुदायात्मकाश्च सन्ति। यथा च हस्तप्रसारणस्थालीविन्यासेष्टकाविनि–योजनादयः अधिश्रयणक्रियायाः अवयवास्सन्ति। परन्त्वेते हस्तप्रसारणाद्यवयवव्यापारा अपि हस्तप्रसरणाद्य भिप्रायेणाधिश्रयतीत्याख्यातवाचकेन पदेनाभिधीयन्ते। अत एवाधिश्रयणादयः व्यापारा अपि अध्यारोपितसमुदायरूपत्वेन क्रियात्वमनुप्राप्य कालत्रये अध्यशिश्रियत्, अधिश्रयिष्यति, अधिश्रयतीत्याख्यातवाचकैः पदैः अभिधीयन्ते। एवमधिश्रयणाद्यवयवानां क्रियात्वेनावयव–समूहात्मकत्वात् मुख्यापाकक्रियामिवाप्रत्यक्षत्वं विजानीयम्। यथा चाम्बाकर्त्रीकारोऽपि ब्रूते–स्थालीग्रहणार्थं हस्तप्रसारणं, चुल्युपरि स्थालीविन्यासः, चुल्लिकानिर्माणार्थमिष्टकाविनियोजन–मित्यादयोऽधिश्रयणावयवाः अध्यारोतिसुदायरूपाः कालत्रयाभिधायिना अपि शब्देन लुङ्लृट्लङ्रूपेण प्रत्याय्न्ते। इत्यधिश्रयणादीनामपि अवयवसमुदायात्मकत्वात्, क्षणप्रध्वंसिनां व्यापाराणां समुदायस्य चावर्तमानत्वात् पच्यादिक्रियावत् अप्रत्यक्षत्वमेवेति।[२१]

एवमवयवशः क्रियायाः प्रत्यक्षत्वाच्चावयवपरम्परयापकर्षमनुप्राप्तस्य क्रियाक्षणस्य क्रियात्वं न प्रकल्पनीयम्। यतोहि स चापकर्षमनुप्राप्तः क्रियाक्षणः वस्तुतः निरवयवः अक्रमः भेदरहितश्चास्ति। अत एव तत्रैकस्मिन् निरवयवे क्रियाक्षणे क्रियाशब्दः न प्रयुज्यते। अल्पीयसः परमाणुप्रख्यस्या–शक्यावयवविभागस्य क्रियाक्षणस्य क्रियात्वं नास्ति। आश्रितकरूपत्वात् क्रियाया इति। न तेन क्रियायाः अप्रत्यक्षता व्यभिचार उद्भावनीय इत्यर्थः। क्रियात्वाभावादेव च क्रियाशब्दस्याप्रयोगः। शब्दार्थोऽर्थ इति न्यायात्। क्रियाशब्दप्रयोगे क्रियात्वाभावमाह। साध्यमानरूपतया हि तिङन्तेनाभि–धीयमानोऽर्थः क्रिया। केवले च निरंशे क्षणमात्रे क्रियाशब्दाप्रयोगः।[२२] यथोक्तञ्च वाक्यपदीये—

**यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते।**
**तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते॥**[२३]

क्रियानामेयमत्यन्तामपरिदृष्टेति भाष्यप्रामाण्यानुरोधेन तु क्रियात्वाधिकरणेऽप्रत्यक्षतोप–पादनीयास्ति। अत्रापकर्षमनुप्राप्तः क्रियाक्षणस्तु क्रियात्वमेव न प्राप्नोति। अत एव क्रियात्वाभावात् क्रियाशब्दोऽपि तत्र न प्रवर्तते। वस्तुतः अपकर्षभागस्य तु इन्द्रियासंवेद्यत्वात् अप्रत्यक्षत्वं स्पष्टमेव। परन्तु क्रियात्वाधिकरणे अप्रत्यक्षतोपपादनेन अपकर्षोन्मुखः क्रियाक्षणः प्रत्यक्षः स्यात् वाप्रत्यक्षः। स च यावत् क्रियात्वं नानुप्राप्नोति तावत् तस्याप्रत्यक्षत्वं न कल्पनीयम्। अत एव अपकर्षमनुप्राप्तस्यावयवस्य प्रत्यक्षत्वेऽपि न क्षतिः। यदा त्वपकर्षमनुप्राप्ते भागे क्रियापदस्य प्रयोगः क्रियते तदा तु स एकोऽपि निरवयवः क्रियाक्षणः समुदायगतपौर्वापर्यक्रमस्याध्यारोपात् क्रियात्वमवाप्नोति।[२४] यथा च वाक्यपदीयकारोऽपि प्रतिपाद्यते—

**पूर्वोत्तरैस्तदा भागैः समवस्थापितक्रमः।**
**एकः सोऽप्यसदध्यासादाख्यायतैरभिधीयते॥**[२५]

एवं प्रधानक्रियामिव फलाभिसन्धिभेदेन सर्वेषामवयवानामपि क्रियात्वमिति सिद्धान्तः व्यवस्थापितः।

**सन्दर्भग्रन्थ—**

१. वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या ५२, तत्रत्या अम्बाकर्त्रीटीकायां लिखितमस्ति। पृष्ठ संख्या ५०३

२. वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या १

३. अत्र सिद्धमितिपदं भूतकालस्योपलक्षकं निष्पन्नमिति यावत् यथा अपाक्षीत् अगमत् इत्यादि असिद्धमिति पदन्तु वर्तमानभविष्यकालयोरूपलक्षकं, अनिष्पन्नमिति यावत्, यथा पचति पक्ष्यतीत्यादि। आश्रितक्रमरूपत्वादिति पदेनाधिश्रयणाद्यवयवानां पौर्वापर्यं विजानीयम्। सिद्धत्वञ्च क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकत्वं तद्भिन्नत्वम् असिद्धत्वम्।

४. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः कारिकासंख्या १७ तस्याः व्याख्यानावसरे।

५. पाणिनीयं सूत्रम् ३.२.१२३ वृत्तिः—वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्।

६. वैयाकरणभूषणसारे धात्वर्थनिर्णये पञ्चमी कारिकेयम्।

७. वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या ४

८. तत्रावयवभूतानां व्यापाराणां समुदाये गुणभावापत्या प्राधान्यप्रयुक्तस्य शब्दभेदप्रयोजकत्वस्य तत्राभावादेकधातूपात्ता क्रिया समुदायस्वभावा एकाऽवतिष्ठते। तस्याश्चावयवाश्रयः क्रमः पौर्वापर्यञ्च तत्र व्यवह्रियते। व्यापाराणां समुदायस्तदाश्रयमेकत्वञ्चाध्यारोपितं न तु वस्तुभूतम्। उत्पत्तिसमानन्तरमेव निरुद्धानामवयवानां वस्तुभूतसमुदायाभावात्। वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या ४ तस्याः व्याख्यानावसरे अम्बाकर्त्रीटीकायां लिखितमस्ति। अत्रैव क्रियासमुद्देशस्य चतुर्थकारिकायाः व्याख्यानावसरे हेलाराजीयव्याख्यानमिदम्।

९. अवयवानां विभागो विचटनम्। वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या ४ तत्रत्या अम्बाकर्त्री।

१०. फलं प्रति व्यवहृतैरप्यधिश्रयणादिभिः समीहितफलानुगुणैः यथायथं कर्मणि फलरूपो विशेष आधातव्यः, इत्यनेकापेक्षे कार्यफलरूपे जननीये आनन्तर्यमात्रेण नासौ कस्यचिदेव व्यापारस्य कार्यभूतो विशेष इति फलविशेषसम्पादकत्वेन पचादीनां धातूनामर्थो यावान् प्रतीयते तावान् सर्वोऽपि स्वरूपतो बहुत्वेऽपि फलैक्यादेकत्वेनाध्यवसीयमानः क्रियेति व्यपदिश्यत इति। वाक्यपदीयं पदकाण्डम् क्रियासमुद्देशः कारिकासंख्या ४ तत्रत्यामम्बाकर्त्रीव्याख्यायाम्, पृ० ४४६

११. अधिश्रयणादीनां व्यापाराणां यः समुदायो बुद्ध्यैकत्वेन गृहीतोऽवस्तुभूतोऽपि स पचत्यादीनां धातूनां वाच्यः। समुदायादेव हि फलं निष्पद्यते, न विचटनमात्रात् अवयवानां विभागो विचटनम्, न विभक्तेभ्योऽवयेभ्य एकेनैव व्यापारेण फलनिष्पत्तौ अधिश्रयणादिरूपेतरव्यापार-वैयर्थ्यप्रसङ्गात्। वाक्यपदीयम्, क्रियासमुद्देशः कारिकासंख्या ४ तत्रत्याम्बाकर्त्री।

१२. यदि व्यापारसमुदायः क्रिया तर्हि अधिश्रयणादीनामवयवानां पचिक्रियात्वं न स्यात्। दृश्यते च तेषामपि क्रियात्वम्। किं करोतीति प्रश्ने अधिश्रयतीत्यभिप्रायेण पचतीत्युत्तरदर्शनात्। तथा च सर्वासु अधिश्रयणाद्यवस्थासु प्रत्येकं पचतीति प्रत्ययो न प्राप्नोति। वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या ५ तस्या अवतरणोपक्रमे उक्तमेवमम्बाकर्त्री।

१३. समुदायस्य प्रत्येकमवयवेष्वध्यासात् प्रत्येकमवयवेषु क्रियात्वप्रत्ययोत्पत्तिः। अवयवेषु प्रत्येकं क्रियासमुदायस्याध्यासश्च सर्वेषु अवयवेषु पचतीति प्रत्ययस्यानुवृत्तेरेव ज्ञायते। व्यापारसमुदायस्य प्रत्यवयवमध्यारोपेन परिसमाप्तत्वाच्च क्रियात्वाध्यारोप उपपद्यत एव। वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या-४ तत्रत्या अम्बाकर्त्र्याम्, पृष्ठ ४४७।

१४. अत्रैव क्रियासमुद्देशस्य पञ्चम्याः कारिकायाः हेलाराजीयप्रकाशाख्यटीकायामुक्तमेवम्। पृष्ठ ४४७

१५. वाक्यपदीयम् ३.७.५८

१६. वाक्यपदीयम्, पदकाण्डम्, क्रियासमुद्देशः कारिकासंख्या ५

१७. कर्तुरीप्सित कर्मेत्युच्यते, कथं च नाम क्रियया क्रियेप्सिततमा स्यात्? क्रियापि क्रियेप्सिततमा भवति। कया क्रियया। सन्दर्शनक्रियया वा, प्रार्थयति क्रियया वाऽध्यवस्यति क्रियया वा। इह य एषः मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्कञ्चिदर्थं सम्पश्यति। संदृष्टे प्रार्थना। प्रार्थनायामध्यवसायः अध्यवसाय आरम्भ आरम्भे निवृत्तिः निवृत्तौ फलावाप्तिः एवं क्रियापि कृत्रिमं कर्म। सम्प्रदानसूत्रस्थभाष्ये उक्तमेवम्।

१८. भ्वादिसूत्रस्थभाष्ये १.३.१

१९. वाक्यपदीयस्य क्रियासमुद्देशस्य षष्ठकारिकायाः अम्बाकर्त्री, पृष्ठ ४४८

२०. वाक्यपदीयस्य क्रियासमुद्देश्य नवमकारिकायाः हेलाराजीयप्रकाशाख्याटीकायामुक्तमेवम्।

२१. वाक्यपदीयस्य क्रियासमुद्देशस्य नवमकारिकायाः अम्बाकर्त्रीव्याख्यामुक्तमेवम्।

२२. वाक्यपदीयस्य क्रियासमुद्देशस्य दशमकारिकायाः अम्बाकर्त्र्यामुक्तमेवम्।

२३. वाक्यपदीयस्य क्रियासमुद्देशस्य नवमकारिका।

—सहायकाचार्यः (व्याकरणविभागे)
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,
(मानितविश्वविद्यालयः)
नवदेहली-११००१६

# उपनिषत्सु आध्यात्मिकचिन्तनम्

**—डॉ० राधेश्याम गंगवारः**

ब्रह्मज्ञानार्थं गुरुमुपगम्य सविनयं स्थिति उपनिषदिति। शास्त्रमेतत् तत्त्वज्ञान-प्रतिपादनाद् उपनिषद्, ब्रह्मज्ञानविवेचनाद् ब्रह्मविद्या, वेदानां सारभूतसिद्धान्तानां संविधानाच्च वेदान्त इति निगद्यते। समासतो या विद्या संसारबीजम् अविद्यादिकं विनाशयति, ब्रह्मज्ञानमपुदिशति, पुनः पुनः गर्भ वास जन्म जरा मृत्यु प्रभृतिभ्यः क्लेशेभ्यो निवारयति, सोपनिषदिति दिश्यते। ऐहलौकिकतत्त्वप्रधाना धर्मार्थसाधनोपाया वेदा अपराविद्यायाम्, आत्मतत्त्वप्रधाना मोक्षसाधनपरा उपनिषदः पराविद्यायां गण्यन्ते। मुण्डकोपनिषदि प्रोच्यते—

**''तत्रापरा ऋग्वेदो यजुर्वेदः, अथ परा यया तदक्षरमधिगम्यते''।**[१]

भारतीयैर्मनीषिभिर्दार्शनिकैर्धर्माचार्यैः पौरस्त्यैः पाश्चात्यैश्च विशारदैः उपनिषदां सामाजिकं सांस्कृतिकम् आध्यात्मिकं धार्मिकं नैतिकं दार्शनिकं राष्ट्रियं च चिन्तनं सर्वातिशायीति मुक्तकण्ठेन स्वीक्रियते। तथा हि उपनिषद एताः प्राधान्येन ब्रह्मविद्योपदेशिकाः, अध्यात्मज्योतिः प्रदीपिकाः, मायामोहान्धतारिकाः, अज्ञानतिमिरापसारिकाः, दुःखत्रयाभिघातिकाः, श्रेयोमार्गसन्दर्शिकाः, परमपुरुषार्थाध्यापिकाः, नैतिकसिद्धान्तोपदेशिकाः, परमसुखसाधिकाः, आत्महितार्थविवेचिकाः, मानवजीवनोद्धारिकाः, सर्वसंशयापवारिकाः, सर्वकामापहारिकाः, ब्रह्मलोकार्थप्रवर्तिकाः, मोक्षमार्गार्थप्रेरिकाश्च सन्ति। ततः परं सर्वमपि भारतीयं धर्मशास्त्रं दर्शनशास्त्रम् आचारशास्त्रं नीतिशास्त्रादिकं च ताभ्यः प्रभावितं विद्यते। अतः सर्वेषां शास्त्रग्रन्थानां विद्यानां कलानां च मूलमन्त्रः समन्विष्यते, प्रमाणत्वेन चोररीक्रियते। ब्रह्मसूत्रेषु निगद्यते—

**अध्यात्मप्रधानायां प्रस्थानत्रय्याम् उपनिषदां महत्त्वं सर्वमतिवर्तते।**[२]

उपनिषदाम् अध्यात्मज्ञानेनैव आर्यराष्ट्रस्य भारतवर्षस्य गौरवं निखिलेऽपि भूतले जेगीयते। उपनिषदो हि स्वकीयया अध्यात्मज्योतिषा भुवनमेव भासयन्ति, जन्म-जरा-मृत्यु-आधि-व्याधि सन्तप्तचेतसः सन्तर्पयन्ति, मानवान्तःकरणं प्रदीपयन्ति, अभ्युदयनिःश्रेयस्सिद्ध्यै पन्थानं प्रदिशन्ति च। ताभ्य एव भारतीयसंस्कृतिः अध्यात्मसंस्कृतिरिति प्रथते।

तदत्र अध्यात्मचिन्तनप्रसङ्गेऽस्माभिः आत्मा, ब्रह्म, त्रैतवादः, मोक्षविषयश्च समासतो विव्रियते प्रस्तूयते च।

**आत्मनः स्वरूपम्**—उपनिषत्सु आत्मतत्त्वं विस्तरेण प्रतिपाद्यते। सैष सूक्ष्मातिसूक्ष्मोऽर्थाद् अणुपरिमाणो विद्यते—'**अणीयान्ह्यतर्क्यमणुप्रमाणादिति**[३]।' अन्यत्र सोऽयं शरीरे अन्तस्थितो-ङ्गुष्ठप्रमाणः प्रदिश्यते—'**अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठतीति**[४]।' एष सर्वेषु जीवेषु सामान्यतस्तिष्ठति। नैतस्य बोधः सर्वसाधारणैः सम्भाव्यते। स एव शरीराच्छरीरं परिवर्तयति अर्थाज्जीर्णानि शरीराणि विहाय नवानि संयाति।

तत्त्वमेतद् धर्माधर्मात् कृताकृताद् भूताद् भव्याच्च सर्वथाऽन्यदेव। जन्तोः गुहाहितो ह्यणोरणीयान् महतो महीयानस्ति। नायं जायते, न विपद्यते, नैतस्य निमित्तं नैव नैमित्तिकम्। सच्चिदानन्द-स्वरूपोऽयम् अजरोऽमरोऽभयः, नित्यः, शाश्वतः पुराणश्चेति। पंचभौतिके कलेवरे हन्यमानेऽपि

तथैव विद्यते। विपश्चिदेष भूतेषु रथीव तिष्ठति। तत्र शरीरं रथ:, बुद्धि: सारथि:, मन: प्रग्रह:, इन्द्रियाणि हया:, विषयाश्च गोचरा इव प्रवर्तन्ते। सैष इन्द्रियमनोयुक्तो भोक्तेति निगद्यते। सुदुष्करं ह्यात्मज्ञानम्। न श्रुतेन, न मेधया, न वा प्रवचनेन लभ्यते। तथाहि—

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्।।**[५]

विधातु: कृपयैव जायते आत्मज्ञानं विलक्षणं कर्मज्ञानं च। यतश्च एष एकत्र स्थितोऽपि दूरं व्रजति, शयानोऽपि सर्वत्र याति। सर्वेषां वेदानां प्रतिपाद्य:, तपसो ब्रह्मचर्यस्य च लक्ष्यभूतोऽयम्। एतदेव ब्रह्म इति व्याह्रियते। माण्डुक्योपनिषदि प्रोच्यते—'**अयमात्मा ब्रह्म**'।

आत्मनो ज्ञानेनैव मोक्षाधिगम:। अत एव तज्ज्ञानाय प्रयत्नो विधेय:। तस्योपलब्धिमार्गश्च क्षुरस्य निशिता धारेव दुर्गमो दुर्लभश्च। उक्तं च—

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति।।**[६]

**परमात्मस्वरूपम्—**

उपनिषत्सु परमात्मन: स्वरूपं सम्यक्त्वेन प्रतिपाद्यते। तदत्र परमात्मा परागति: पराकाष्ठा च। तदेव वेदान्ते ब्रह्म, सांख्ये च पुरुष इत्यभिधीयते। इन्द्रिय मनो बुद्ध्यादिभ्यस्तस्य पार्थक्यं प्रतिपादयता उपनिषदि निगद्यते यदिन्द्रयेभ्य: परा विषया:, विषयेभ्य: परं मन:, मनस: परा बुद्धि:, बुद्धिभ्य: परो महान् आत्मा, महत: परमव्यक्तम्, अव्यक्तात् पर: पुरुष: परमात्मा विद्यते। तत: परन्तु न किंचिदस्ति। तदेव सर्वेषु प्रधान:, पराकाष्ठा परागतिश्च। तथा हि—

**इन्द्रियेभ्य: पराह्यर्था अर्थेभ्यश्च परं मन:।**
**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् पर:।।**
**महत: परमव्यक्तमव्यक्तात् पुरुष: पर:।**
**पुरुषान्न परं किंचित् सा काष्ठा सा परागति:।।**[७]

वेदेषु तदेष परमात्मा 'ओमि'ति पदेन व्याख्यायते। उपनिषत्सु तदेव ओम पदवाच्यं ब्रह्म प्रोच्यते। सर्वेषु भूतेषु चराचरेषु गूढात्मा नात्मानं प्रकाशते। सूक्ष्मदर्शिभि: सूरिभिरेव सूक्ष्मबुद्ध्या दृश्यते। अशब्दम् अस्पर्शम् अरूपम् अव्ययम् अरसं नित्यम् अगन्धवद् अनादि अनन्तं महत: परं ध्रुवं च तमेव विज्ञाय तत्त्ववित् मृत्युमुखात् प्रमुच्यते। तदेव सम्पूर्णब्रह्माण्डकारणं ब्रह्मेति वर्णयता कठोपनिषदि व्याह्रियते—

**तस्मिल्लोका: श्रिता: सर्वे तदु नात्येति कश्चन एतद्वै तत्।।**[८]

एतेनैव जगतस्तस्थुषश्च सर्वभूतेषु एकत्वं समीक्ष्यते। तज्जातं सर्वमपि जगत्तेनैव व्याप्तमिति ईशावास्योपनिषदि व्यादिश्यते—

**ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत्।**
**तेन त्यक्तेन भुंजीथा मा गृध: कस्यस्विद्धनम्।।**[९]

वस्तुतस्तु अध्यात्मयोगेनैव सर्वत्र एकत्वानुभूति:, शोकनिवृत्ति: आनन्दावाप्तिश्च संजायते।

तस्य तत्त्वज्ञानं नैव देहिनां सर्वेषां संभवति। तत्त्वविदेव तदात्मानं विज्ञातुं शक्नोति। अथ च हर्षशोकौ सन्त्यज्य परमानन्दं विन्दति। कठोपनिषदि निगद्यते—

**तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।**
**अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥**[१०]

विधातुः कृपयैव संभवमस्य दर्शनं विलक्षणं कर्मज्ञानं च। अत एव ब्रह्मत्वप्राप्तिर्हि मानवजीवनस्य उद्देश्यम्। तेनैव सर्वग्रन्थीनामुच्छेदः सर्वसंशयानां निरोधः, सर्वदुरितोपरोधः परमधामावाप्तिश्च—

**'तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय' इति।**[११]

**ब्रह्मज्ञानस्य महत्त्वम्—**

अनित्ये लोकेऽस्मिन् एकं ब्रह्म एव नित्यं वस्तु। अतो जीवने ज्ञातव्यं ध्यातव्यम् अन्वेषितव्यं च तदेव। उक्तं च तैत्तिरीयोपनिषदि—''**यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्मेति**''॥[१२] तदेव सर्वप्रधानं सर्वेषां वेदानां तपस्यानां ब्रह्मचर्यादिव्रतानां प्रयोजनं चेति निरुप्यते—

**सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्॥**[१३]

ब्रह्मज्ञानेनैव जीवनं शुद्धं शान्तं निरंजनं निरामयं विज्ञानमयम् आनन्दमयं च संजायते। तत एव जीवनस्य साफल्यं सार्थकत्वं च। छान्दोग्योपनिषदि कथ्यते—

**सर्वं खल्विदं ब्रह्म तज्जानातीति शान्त उपासीत।**
**एषा ब्रह्मणोऽनुगाथा यतो यत आवर्तते तत्तद् गच्छति॥**[१४]

ब्रह्म एव ज्ञेयं नित्यमात्मस्थम्। नातः परं वेदितव्यम्। भोक्तृत्वेन, भोग्यत्वेन, प्रेरकत्वेन च सर्वत्र समश्नुते। उक्तमपि—''**एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित्। भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म एतत्॥**''

**जीवेशयोः संयोगः—**

जीवात्मा परमात्मा च मोक्षधाम्नि, परमे पदे स्वात्मभावे सत्यस्वरूपे परमानन्दमयौ भवतः। तयोरवस्थितिः स्वरूपे विद्यते संयोगश्च छायातपाविव राजते। आतपे हि वर्वति छायाभावः। अतो नैव तमस्तिष्ठति। उक्तं च कठोपनिषदि—

**ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे।**
**छायातपौ ब्रह्मविदो विदन्ति पंचाग्नयो ये च त्रिणाचिकेताः॥**[१५]

**त्रैतवादः—**

वेदानुरूपमेव उपनिषत्सु त्रैतवादो वर्ण्यते। तत्र सखायौ जीवेश्वरौ प्रकृतितरुं श्रयेते। जीवो वै पिप्पलं स्वादु कर्मफलं भुङ्क्ते। ईश्वरस्तु अनश्नन्नेवास्य साक्षिरूपस्तिष्ठति। श्वेताश्वेतरोपनिषदि प्रदिश्यते—

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥**[16]

**मोक्षप्राप्तिः**—विषयेभ्यो निवृत्तिः मनसो बुद्धेश्चाप्रवृत्तिरिति मुक्तिः। तामेव परमां गतिमाह—'यदा पंचावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्॥' ततः परं हृदयस्थान् सर्वानपि कामान् परित्यज्य जायते अमरत्वप्राप्तिः। अत उच्यते—

**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिश्रिताः।**
**अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥**[17]

'सर्वं खल्विदं ब्रह्म' 'अयमात्मा ब्रह्म' 'अहं ब्रह्मास्मि' 'तत्त्वमसी'ति महावाक्यानि जीवात्मनः समुन्नतेः पराकाष्ठां बोधयन्ति। तत्र निष्कामकर्मयोगः समपेक्ष्यते। ईशोपनिषदि दिश्यते—'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥'[18] ज्ञानकर्मणोः समन्वयेनैव पुरुषोऽमरत्वमेति। उक्तं च तत्र—अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते इति।[19] ततः सर्वभूतेषु सौमनस्यं विश्वबन्धुत्वं च समेधते। तथोच्यते—

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥**[20]

उपनिषत्सु आत्मविद्यायाः सिद्धान्ताः संवादरूपेण, प्रश्नोत्तररूपेण, आख्यानरूपेण च सरलरीत्या प्रतिपाद्यन्ते। इत्थंकारं भारतीयविद्यानाम् उपनिषदाम् ज्ञानमेतत् राष्ट्रस्य सर्वोत्कृष्टं गौरवं विश्वस्मिन् विश्वे चानुपममेव। एतासामनुशीलननैव जायते सन्तापशान्तिः, सर्वदुःखनिवृत्तिः परमानन्दप्राप्तिः, ब्रह्मत्वानुभूतिश्चेति दिक्।

---

**सन्दर्भ सूची—**


१. मुण्डकोपनिषद् १.१.५
२. उपनिषद्, ब्रह्मसूत्र, गीता
३. कठोपनिषद् १.२.८
४. तत्रैव २.१.१२
५. तत्रैव १.२.२३
६. तत्रैव १.३.१४
७. तत्रैव १.३.१०-११
८. वही २.२.८
९. ईशोपनिषद् १.१
१०. कठोपनिषद् १.२.१२
११. श्वेताश्वेतरोपनिषद् ३.८
१२. तैत्तिरीयोपनिषद् ३.७.१
१३. कठोपनिषद् १.२.१५
१४. छान्दोग्योपनिषद् ३.१४.१ व ४.१७.९
१५. कठोपनिषद् १.३.१
१६. श्वेताश्वेतरोपनिषद् ४.६
१७. कठोपनिषद् २.३.१४
१८. ईशोपनिषद् १.२
१९. तत्रैव १.११
२०. तत्रैव १.६



—सहायक आचार्यः
(संस्कृत) बी.एस.के.सी. राजकीय महाविद्यालयः,
डाकपत्थर, विकासनगरम् (देहरादूनम्)

# संस्कृतस्य उन्नयने अवरोधाः उपायाश्च

**—डॉ० आभा झा**

संस्कृतम् अस्माकं भारतीयानां ज्ञानवाहिनी, सामर्थ्यशालिनी, विविधोपयोगिज्ञानवाहिनी, विश्वमानसाकर्षिणी च भाषा अस्ति। कापि भाषा तदीयवाङ्मये स्थितस्य विचारस्य समाज विशेषे ग्राह्यताबोधेन एव शिक्षणीया पठनीया वा भवति। अद्यत्वे इयं भाषा कुत्रापि सामान्य जनानां विचारविनिमय—साधनीभूता नास्ति, तथापि स्वगुणवैभवमहिम्ना अद्यापि भारतस्य सर्वेष्वेव भागेषु, विश्वस्य अन्येष्वापि च देशेषु बहुत्र विविधं पठ्यते पाठ्यते च। पूर्वमियं भाषा विद्यादानव्रतैः त्यागमयजीवनैः बहुभिः एव विद्वद्भिः स्वतन्त्रं निःशुल्कं च पाठ्यते स्म। शनैः शनैः सामाजिक–जीवन–विकासेन समं शिक्षण–व्यवस्थायाः स्वरूपः परिवर्तितः। परिवर्तनप्रियता नवानुसन्धानप्रवृत्तिः च नवनवं सृजति नवनवां रीतिम् रुचि–प्रवृत्तिं च विकासयति। परिणामे कालेन सह सर्वं परिवर्तते।

अद्यत्वे भारते सर्वत्रैव संस्कृतशिक्षणस्य लोकमान्यम् शासनेन च स्वीकृतं संरक्षितम् द्विकक्षम द्विविधं च रूपं विद्यते। एकस्मिन् बहुजनस्वीकृते कक्षे पाठ्यविषयसमुदायस्य अन्यतमांगतया संस्कृतं पाठ्यते, यत्र प्रायेण पठनपाठनशैली पाश्चात्य पठन पाठनप्रणाल्याः अनुकारिणी अनुसारिणी च। अस्यां प्रणाल्याम् प्रश्नानाम् उत्तरोपस्थापने अभिव्यंजनसामर्थ्यतया संस्कृतस्य अनिवार्यतया नास्ति। न च विद्यालयः विश्वविद्यालयो वा अपेक्षते छात्रः संस्कृतभाषया आत्मप्रकाशने अपरिहार्यम् क्षमो भवतु। अवश्यम् अद्यापि अनेके विद्वांसः संस्कृतभाषया आत्मप्रकाशनं कुर्वन्ति, कर्तुं क्षमन्ते, संस्कृतं पुनः भाषाभूमिं समानेतुं लोकचेतनाम् अनुरुन्धन्ति, बहुत्र स्थितिमिमां समानेतुं प्राप्तसाफल्या अपि सन्ति, तथापि भाषायाः अस्याः लोकभाषात्वं नैव स्वीकार्यम् भवेत्। संस्कृतस्य प्रयोजनीयता अतीव ह्रासं गतास्ति। न च संस्कृतं शिक्षणोत्साहस्य यौवनं विभर्ति। अस्मिन् सर्वम् अस्ति, परं प्राणस्पर्शी समुत्साहः स्वविषये लोकदृष्टिं निरीक्षमाणा अवधानसंजीवना दृष्टिः नास्ति। चालकस्य निरीक्षणपरां दृष्टिं विना किमपि–यानम् अभीष्टां गतिं नायाति। अत्र संस्कृत शिक्षणे लोकोपयोगनिरपेक्षा गतिः भाषायाः अस्याः महत्वं ह्रासयति। अधुनां अस्माकं विवेच्यः विषयः अस्ति–संस्कृतस्य विकासमार्गे अवरोधाः करणीयानि कार्याणि च।

विषयस्यास्य विवेचनात् पूर्वम् अस्माभिः ज्ञेयमस्ति का नाम शिक्षा?—शिक्षा विद्यायाः उपादानं भवति (शिक्ष् विद्योपादाने) अन्तः सुप्तायाः प्रकाशप्राणयाः शक्तेः समुद्बोधनम्, बीजस्य सुपुष्प—सुफलवृक्षभूमिप्रापणम् च। शिक्षायाः अस्य स्वरूपस्य समुपलब्धौ शिक्षार्थिनः स्वीया प्रवृत्तिः अपि कारणत्वं भजते, परस्यापि अधि—सामर्थ्यभाजः ज्ञानदानप्रवृत्तिः कारणायते। अत्रैव शिक्षणस्य सामाजिकी व्यवस्था रूपं जग्राह। तत एव वर्तमान व्यावसायिक शिक्षण–व्यवस्थायाः विद्यालयीयस्वरूपस्य समारम्भः अभवत्। अत्र विचारणीयाः विषयाः—विद्यालयेषु महाविद्यालयेषु वा संस्कृतशिक्षायाः स्थितिः, तदुद्गताः समस्याः, काम्या च दृष्टिः। सर्वप्रथमं संस्कृत शिक्षणस्य या स्थितिः अद्यत्वे विद्यालयेषु दृश्यते तस्याः उपरि सूत्ररूपेण विधेयस्य किमपि स्वरूपं विदुषां विचारणाय प्रस्तूयते।

संस्कृतम् एका भाषा। भाषायाः कार्यं भवति भावस्य प्रकाशनम्। परं भाषते अनया इति

भाषेति दृष्ट्या अस्याः भाषायाः भाषात्वं विलुप्तिं गतमिव। यावत् कोपि समाजः कामपि भाषां स्वकथ्यप्रकाशनस्य व्यवहारपरिणतं साधनं न मन्यते, व्यावहारिकेन जीवनेन न योजयति, तावत् भाषायाः भाषात्वं आकारं ग्रहीतुं न प्रभवति। अतः सर्वप्रथमं भाषायाः प्रयोगे प्रयाससंजीवनं तत्त्वं सर्वथा अपेक्षितं स्यात्। परं हन्त! अद्य शिक्षणपद्धतिः परीक्षापद्धतिश्च ईदृशी संजातऽस्ति यदद्य संस्कृतभाषायां मनोभावप्रकाशनं छात्रेषु नापेक्षते इति छात्राः तदध्ययने वस्तुतः संयोजितप्राणाः न भवन्ति। अद्यतनी शिक्षाव्यवस्था संस्कृतभाषां वस्तुतः ज्ञेयशिक्षणीयभाषास्वरूपं प्रापयितुं न प्रयतते।

अद्यत्वे राष्ट्रे प्रमुखतां भजमाननां शिक्षणसंस्थानानाम् शिक्षणीय विषयेषु याः तिस्रः भाषाः लब्धस्थानाः वर्तन्ते यासु द्वे अनिवार्ये-सर्वस्वीकार्ये, एका स्वरूचिस्वीकार्या (ऐच्छिकाख्या)। तत्र संस्कृत-भाषा ऐच्छिकभाषाकक्षगैव। अत्रैव प्रसंगे सर्वध्येयम् तथ्यम् वर्तते यस्य विषयस्य नहि अनिवार्या पाठ्यता तस्मिन् विषये प्रायः सामान्यायां छात्रानां नाम्नैव पठनीयता मननीयता दृष्टिः भवति। परिणामः सर्वथा सर्वदृश्यः।

अद्य सर्वत्र अध्यापकेषु छात्रेषु च एका समा दृष्टिः-आगामिन्यां परीक्षायां किम् प्रष्टुम् शक्यते, कथं च तस्योत्तरम् स्पृहनीयमंकम् प्रापयिष्यति, कथं वा परीक्षाफलं स्पृहनीयं भवेत्। अध्येतव्यस्य **विषयस्य आत्मनः साक्षात्कारः कथं स्यात् इति सजीवा कामना कुत्रापि दृष्टिपथे नायाति।**

**कस्या अपि भाषायाः द्वे प्रधाने तत्त्वे भवतः—तद्भाषावाङ्मये—रचयितुः ज्ञानसम्पत्तिः भावव्यंजनशक्तिश्च। छात्रेषु उभयोरेव विकासः तस्याः भाषायाः शिक्षणेन साध्यः स्यात्। परमद्य संस्कृत-शिक्षणे व्यावहारिकी उपयोगिता दृष्टि नानुरूध्यते, न च विकासपथं नेतुमिष्यते। इयमेव संस्कृतशिक्षणस्य विडम्बना।** संस्कृतभाषा सर्वासां भारतीयभाषाणां माता, सर्वाः अन्याः भाषाः इत एव लब्ध-समुद्भवाः, अद्यापीयं सर्वासामेव भाषाणाम् अपेक्षितशब्दाभावसंकटे सहायिका। कम्प्यूटर नामके यंत्रकक्षे अद्यापीयं स्वां सर्वापेक्षया अधिकग्राह्यतां प्रमाणयति। कथ्यस्य संक्षिप्तं बोधने भाषायाः अस्याः अनुपमा गतिः। परम् जलागमद्वारः कासार इव व्यवहार्य जलाभावेन सामान्यजनानाम् उपेक्षाभूमिरियम् भाषा जाता अस्ति।

कोऽपि ज्ञानशीलो जनः उपयोगिताबोधेन विना किमपि प्राप्तुं यत्नवान् नहि भवति। संस्कृतभाषायाः उपरिदर्शितायाः स्थितेः विषये विचारणाकाले संस्कृतकक्षे एव लब्धस्थाना लोकोक्तिः विद्युदिव मानसाकाशं विद्योतितं विधत्ते—**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।** मानवः चिंतनमननतर्कणप्रवणः प्राणीति वयं सर्वथा सर्वदा विधेय विषये धियम् परिणामदृष्टिप्रकाशेन प्रकाशितां रक्षेम, निष्प्रयोजनं किमपि क्षेत्रम् स्वीकर्तुं नैव चिन्तयेम! अद्यत्वेपि केनापि अख्यातनाम्ना विदुषा इयमुक्तिः लिखितास्ति **विद्या न सा या न जनोपयोगिनी।** तदस्मिन् प्रसंगे इदमेव कथ्यम् **संस्कृतस्य रक्षणप्रसारणादिकामयमानेन सर्वभावेन प्रयासो विधेयः, संस्कृतभाषायामपि ज्ञेयाः प्रमुख विषयाः गृहीतकलेवराः भवेयुः येन तत्तदुपयोगिविषयज्ञान-लिप्सवोपि भाषामिमां पठित्वा लब्धकाम्या भवेयुः।**

इदञ्च सर्वदा सर्वै: दीपितप्रज्ञै: विचारणीयम् स्वां दृष्टिम् नवनवोन्मेषिणीम् विधायैव कोपि नव्यभव्ये इष्टमार्गे संसर्तुम् प्रभवति। अत्र प्रसंगे एका प्राणमयी परिभाषा प्रतिभाया:— **प्रज्ञा नव नवोन्मेषालिनी प्रतिभोच्यते।** एतादृश्या: एव प्रज्ञाप्रभाया: समुद्‌बोधनम् वस्तुतो लोकोपयोगिशिक्षया: साध्यम् भवेत्। विद्यालये अध्येतुम् आगता: छात्रा: जीवनोपयोगिज्ञानं कामयमाना: भवन्ति। तत् सर्वदा सर्वै: इदं संस्मरणीयम्—संस्कृतभाषाप्रचारप्रसारकरणे प्रवर्तमाना: जना: भाषाया: अस्या: विषयकक्षे लोकोपयोगिविषयाणां संनिवेशने स्वयम् अन्यम् वा स्वीकृत्य यत्नवन्तो भवेयु:। अत्र संक्षिप्तं तात्पर्यमिदमेव संस्कृतभाषायाम् पठनीयताविबोधनाय भाषायाम् अस्याम् ते सर्वे विषया: लब्धस्थाना भवेयु: ये जीवनोपयागिताजुष: काम्यपदप्रतिष्ठा वृत्तिदायिनश्च। रक्ष्यतारक्षणस्य प्रयोजनं भवति उपयोगिता, अत: यावत् कापि भाषा समाजस्य दृष्टौ काम्यज्ञानप्रदा न भवेत्—स्वकाये पुस्तके तमभीष्टं प्रकाशं पाठक: न पश्येत्, तावत् तस्याम् रक्ष्यतादृष्टि सप्रकाशा न भवेत्।

भाषाया: परीक्षायां कस्याञ्चन समुत्तरणस्य आधार: स्यात् भावप्रकाशनसामर्थ्यसहचरं भाषाया: ज्ञानम्। अध्यापनकालेऽपि शनै: शनै: उत्तरोत्तरम् संस्कृतभाषाया: प्रयोगे वृद्धिं नेय:। अस्मिन् क्षेत्रे **प्रथमा भूमिका स्यात् संस्कृताध्यापकानाम्।** ते यावत् अस्या: भाषाया: प्रयोगे रुचिं न दर्शयेयु: तावत् छात्रा: एतद् भाषाव्यवहारसामर्थ्यं न प्राप्नुयु:। एतदर्थम् आरम्भे अल्पप्रयासबोध्या एव पाठ्यांशा: निर्धारणीया:। सुपरिचितकोमलमति बालबोध्यविषयरुचीनाम् संस्कृतलेखकानां बालसाहित्यानां समावेश: पाठ्यक्रमे भवेत् चेत् छात्राणां रुचि: जागरंगता स्यात्। तत् संक्षिप्तं इदमेव कथ्यम् संस्कृतभाषाया: आराधक:! आधुनिक जनमानसस्य काम्यं ज्ञानं ददत नवं नवं पुस्तकं विलिख्यं, प्रकाश्य, अस्या: भाषाया: सर्वपठनीयता जनमानसे नयन्तु। **काम्यप्रदा: विज्ञानादि विषया: विलिख्य, प्रकाश्य, अस्या: भाषाया: सर्वपठनीयतां बोधयेयु:। मानवसमाजस्य सर्वाभ्युदयस्य विज्ञानेन्धनं यानम् सर्वस्पृहणीयमिति विज्ञानेनापि दीपेन देववाणीप्रांगणम् विद्योतनं समपेक्षते।** तत् साम्प्रतम् इदमेव कथ्यसारम् भारतस्य प्राक्तनस्य सर्वविधसमृद्धिकालस्य विज्ञजनव्यवहार्या इयम् भाषा अपेक्षितज्ञेयतत्वसंयोजनेन लोकोपयोगिताम् अवश्यम् नेया। देववाण्या: साधनामयं समर्हणम् देवानामेव समर्हणम् भवेत्। **जनमानसम् अद्यतनेनैव नहि प्राक्तनेनापि प्रकाशेन प्रकाशितं रक्ष्यम्। अभिनवं ज्योतिस्तु प्रसारणीयमेव।** अतएव सर्वकार: किं करोति किं च कुर्यात् इति विवादं परिहाय संस्कृतं पठनीयम्, पाठनीयम् च, स्वातीतसाहित्यस्य समुद्रमंथनं कृत्वा कालोपेयोगिसाहित्यं पाठ्यविषये समानीयम्, छात्राणां ज्ञानकोशानां संवर्धनाय अभिनवसाहित्यनिर्माणम्, करणीयम्, संस्कृतभाषायां निहितानां मान्यतत्त्वानां ज्ञानाय विद्यार्थिन: प्रोत्साहनीया:, संस्कृतभाषाया: अभिव्यंजनसामर्थ्यं समुद्‌बुद्धं करणीयम्, अपि च संस्कृतपठेनन अस्य ज्ञानेन गौरवान्वितोऽहम् इति भाव: विकासनीय:। आयुर्वेद, ज्योतिष, योगसाधनादि विषयाणां पठन पाठने रुचि: जागरिता स्यात् यत: इमे विषया: प्रत्यक्षरूपेण स्वोपयोगं प्रदर्शयन्ति।

संस्कृतभाषा अनिवार्यरूपेण पाठ्यतां नेया स्यात्। कोऽपि समाज: पूर्वजानाम् उत्तराधिकारं निर्वोढुं सप्राणं प्रयस्यति यदि, तर्हि संस्कृतस्य ऐच्छिकभाषारूपेण पाठ्यतास्थिति: नैव आगता स्यात्। संस्कृतवाङ्मये निहितं समाजसंजीवनंतत्वं कथं संस्कृताध्येतृणाम् मानसं समुत्प्राणयेत्,

कथं च अधीत संस्कृतवाङ्मयाः विद्वांसः आसेतुहिमाचलं प्रसृतस्य भारतस्य ऐक्यम् लोकचेतनां समुद्बोधयितुं समर्थाः स्युः, एतदर्थम् के के ग्रन्थाः अवश्यं पठनीयाः स्युः, परीक्षार्थिनाम् काम्यज्ञानपरीक्षायां कीदृशाः प्रश्नाः प्रष्टव्याः स्युः, कथं च संस्कृतच्छात्रेषु संस्कृतभाषणलेखन-क्षमता काम्यं विकासं नीता स्यात् एतदर्थम् शिक्षाधिकारिणः विद्वद्भिः सह गभीरां मंत्रणां कृत्वा योजनानिर्माणं कुर्युः, योजनां च व्यवहाररूपताम् आनयेयुः। पाठ्यांशनिर्धारणक्षणे च विद्वद्भिः अधिकारिभिश्च गभीरं चिन्तनीयम्—कथं छात्रेण अधीताः विषयाः छात्रम् समाजेन अपेक्षणीय-ज्ञानसम्पन्नम् विदध्युः, कथं च अधीतसंस्कृताश्छात्राः राष्ट्रस्य नव निर्माणे स्पृहणीयां भूमिकां निर्वहेयुः। कृत्यचेतनायाः विकासः, करणीयकर्मप्रेरणा, क्रियोन्मुखी सम्प्रबुद्धा समाजचेतना च शिक्षणफलानि भवेयुरेव।

संस्कृतस्य सप्राणज्ञानाय इदमपि अपेक्षितं वर्तते यत् अस्याः भाषायाः पाठनं संस्कृतभाषया एव भवतु। विद्यार्थिनः भाषाज्ञानविबोधनाय गुरुमुखात् तस्याः भाषायाः श्रवणम् विषयावबोधनं, ज्ञेयतत्वस्य ज्ञानग्रहणं च अनिवार्यरूपेण अपेक्षितं भवति। **कस्याः अपि भाषायाः भाषात्वं तदैव सुरक्षिता संरक्षिता च भवति यदा सा भाषा तवैव भाषया पठ्यते लिख्यते अवबुध्यते, गृह्यते च।**

पाठ्यक्रमस्यापि निर्माणकाले समुचितविषयचयनस्य, परीक्षा प्रणाल्याम् सप्रयोजन दृष्टिपरिवर्तनस्य, प्राणमयशिक्षणवातावरणनिर्माणस्य, वर्तमानकालेपि उपयोगितां गतानां विषयाणां चयनस्य महती आवश्यकता अस्ति। भाषा कापि पाठ्या भवतु, साध्यम् एकमेव स्यात् समाजस्य भव्यतरीकरणे विनियोजितचेतसां मनुष्याणां निर्माणम्। संस्कृतस्य सप्राणं शिक्षणं जन्मभूमौ मातृतादृष्टिं विकासयितुं क्षमते, जातिसम्प्रदायभाषादिभेदकतत्वनिरपेक्षां दृष्टिं समुन्नयितुं प्रभवति, प्रत्यहं विभेदनकुशलैः स्वार्थसाधनप्रवणैः क्रियमाणं राष्ट्रविखण्डनप्रयासं विफलीकृत्य राष्ट्रम् एकीकर्तुम् शक्नोति। **एतदर्थम् संस्कृतभाषायां यानि प्रेरकानि तत्वानि सन्ति, तानि समुन्मीलितचक्षुषा विदुषा बहिः आनीयानि, तानि च सम्यगनुसन्धाया शिक्षणकक्षे आनेतव्यानि।** संक्षेप संस्कृतस्य विकासाय विधेयः अन्यः उपायः स्यात् पाठ्यक्रमपरिवर्तनस्य। संस्कृतभाषायां लब्धशरीरस्य व्यापकदृष्टिदायिनः साहित्यस्य पाठ्यक्रमे विनियोगः अस्माभिः करणीयः। संस्कृते एतादृशस्य उदारदृष्टिविकासिनः वाङ्मयस्य नैवाल्पता। सममेव आधुनिक-कालगतिविज्ञैः लेखकैश्चापि आधुनिक चेतनागति विषयकस्य वाङ्मयस्य निर्माणे प्रवृत्तिमता भाव्यमेव। संस्कृतविषयनीं लोकधारणां परिवर्तयितुम् संस्कृतशिक्षणे उत्कर्षाधानम् परमावश्यकम्। तच्च उत्कर्षाधानं सम्भवेत् अवधान पुरःसरम् लोकचेतनायाः उदात्तीकरणे सामर्थ्यभाजः संस्कृतवाङ्मयस्य संस्कृतछात्राणां कृते अवश्यपाठ्यत्वनिर्धारणेन, तदध्ययनाध्यापनेन यथार्थं स्वशक्तिविनियोगेन। संस्कृतं सर्वकाम्यम् अद्यतन लोकस्यापि जीवन सम्पोषकं तत्त्वम् विभर्ति इति धारणा यथार्थदृष्टिप्रवणाऽस्ति। शिक्षा कापि भवतु सा स्यात् मानवीयदृष्टिप्रकाशनप्रयोजना। आर्षचेतनायाः यः पूतः पावनश्च प्राणपरिस्पन्दः वेदवाण्याम् प्रथमं प्राप्तप्रकाशो बभूव तस्य प्राणवान् साक्षात्कारः करणीयः स्यात् , समाजचेतनायाः यथा करणीयतायाः अकरणीयतायाः च दृष्टेः दिशा स्मृतिषु प्रकाशिता बभूव सा विद्यार्थिनां दिदृक्षा भूमिं आनीया, समाजचेतनायाः गति प्रगतिः यथा काव्यवाचं मधुरं मुखरयति तत् परिचयस्पृहा शिक्षार्थिमानसम् समुल्लासयेत् चरैवेति

चरैवेति प्राण प्रेरणा, तमसोमाज्योतिर्गमयेति काम्यलब्धिप्रेरणा असतो मा सद्गमयेति असत्त्यागप्रेरणा मृत्योर्मा अमृतं गमयेति..... प्रेरणा च नूनमेव संस्कृतभाषायाः पठनेन एव प्राप्तुं शक्यते। अद्य समाज समुन्नयनकृत्यैः समाजकर्णधारैः सर्वेषामेव शिक्षण-कक्षाणाम् लोकचेतनायाः अभीष्टयां दिशिः प्रवर्तनाय दिग्निर्देशनं संस्कृतभाषायाः अवश्यमेव ग्राह्यम्।

**भाषायाः अस्याः लोकोपयोगिता प्रापणाय मानवसमाजेन ज्ञेयानां सर्वोपयोगिताजुषां विषयाणां समावेशः अवश्यं विधेयः। वर्तमानस्यापि समाजस्य, जीवनस्य, जीवनसाधनस्य अन्यस्य च ज्ञेयस्य विषयस्य समावेशः अस्यां भाषायां भवेत् तदैव अस्य जीवनोपयोगिता महत्ता च अभिप्रमाणिता भवेत्।**

इदमपि सर्वथा ध्येयं ज्ञेयं च यत् संस्कृताध्येतारोपि जीविकोपार्जनस्य समुचितम् अवसरं प्राप्नुयुः, ससम्मानं जीवनं यापयेयुः, संस्कृतपठनान्तरं ते जीवनस्य कस्मिन् क्षेत्रे वृत्तिं प्राप्स्यन्ति इति सम्यग् जानीयुः। अद्य समाजे एका भ्रान्तिः सप्रयासा प्रसारितास्ति यत् संस्कृतशिक्षणस्य कोपि उपयोगः अद्यतनीय युगे नास्ति न चापि संस्कृताध्येतारः कामपि वृत्तिं लभन्ते। परमियं भ्रान्तिः सर्वथैव निराधाराऽस्ति। संस्कृतं सर्वथा समाप्तिमायातु इत्यस्य सोद्देश्या योजनाऽस्ति। परम् वयमपि षड्यन्त्रमिमं ज्ञात्वा अस्य प्रतिकारं कर्तुम् शक्नुमः। एतदर्थम् अस्माभिः सर्वैः मिलित्वा अस्याः व्यवसायात्मिकम् महत्त्वं ज्ञापयितुं प्रचारः प्रसारः करणीयः। भाषामिमां पठित्वा जनाः कस्मिन् क्षेत्रे कां वृत्तिं लब्धुं शक्ष्यन्ति इत्यस्य **( मार्केटिंग )** अपि करणीयम्। अन्यः माम् हीनभावनाया पश्यति इति अवगत्य अस्माभिः आत्मनः हीनान् न मन्तव्यः अपितु आत्मनः ओजसा दीप्तं स्वरूपं समाजस्य सम्मुखं आनेतव्यम्। कोपि जनः कस्मिन्नपि विषये, कस्मिन्नपि क्षेत्रे, कस्यामपि भाषायां वा स्ववैशिष्ट्यं प्रदर्शयति चेत् जनाः तस्य विद्यावैभवेन, ज्ञानगंभीर्येण, समाजोन्नत्यै कृतेन अवदानेन निःसंशयम् अभिभूताः भवन्ति। अतएव **मुहूर्तं ज्वलितं श्रेयो न च धूमायितं चिरम्** इति सूक्तिं मनसि निधाय संस्कृतस्य विकासमार्गे आगतानाम् अवरोधानाम् अपसारणार्थम् सोत्साहं प्रयासः करणीयः। केचन् संस्कृतविरोधिनः, ते सन्तु नाम शक्तिजुषः प्रभुताजुषः वा विषयस्यास्य पर्वत इव उच्चताम्, जलधि इव गांभीर्यम्, धरित्री इव रत्नगर्भत्वम् च न्यूनीकर्तुम् न अशक्नुवन् न शक्ष्यन्ति वा। एतदर्थम् एकविंशत्याः शताब्द्याः प्रथमे चरणे नव निर्माणकामिभिः सर्वैः एव स्वातीतसाहित्यम् अवश्यं पठनीयम् अवधानपुरस्सरं मननीयं चापि। ततः एव प्रेरणातत्वानि आदाय प्रगतियात्रा कर्तव्या। साधुतायाः असाधुतायाः निर्णयक्षणे सन्तः (सदसद्विवेक कुशलाः जनाः) स्वविवेके गुणदोषपरीक्षणसामर्थ्येन एव सम्यक् परीक्षणं विधाय द्वयोः एकं स्वीकुर्वन्ति। मीमांसागांभीर्यसंगिनी विवेचना प्रबुद्धप्रज्ञानाम् प्रकृतिः भवति। अनुकूल दिक्प्रवर्तकः तर्कः तस्याः साधनं भवति। तर्कस्य विधेयतां प्रतिवादयन् मनुः कथयति—**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।** तत् संस्कृतम् अस्माकं श्रद्धायाः प्रेम्णश्च भाजनं वर्तते अस्मिन् स्थानकाल निरपेक्षं वेदोपनिषदां ज्ञानं अस्माकं वक्षांसि गर्वपूरितानि कुरुते, योगसाधना, तंत्रसाधना, काव्यसाहित्य साधना, आयुर्विज्ञान साधना, धर्मसाधना वा साधकानां मनीषायाः अवतीर्य जनचेतांसि रंजयति। अतएव सर्वां भ्रान्तिं, मनसः सर्वान्धिकारं च परिहाय संस्कृतस्य सप्राणं शिक्षणं परमावश्यकम्।

एष लोकतंत्रकालः। लोकतंत्रे अधिसंख्यानां जनानाम् अभिमतं सर्वाभिमतसंज्ञया स्वीकार्यम्

भवति। तत् संस्कृतस्य अधिसंख्यजनपाठ्यत्वसिद्धये वर्तमानस्य ग्राह्यं तत्वम् अस्मिन् समानेयमेव। एतदर्थम् पाठ्यात् प्राणदृष्टिः परिवर्तनीया भवेत्। **शिक्षणस्यशब्दविश्लेषणपरा दृष्टिः कथ्य-ग्रहणपरा विधेया स्यात्, व्यक्तिदृष्टिः राष्ट्रदृष्टिः विधेया स्यात् परीक्षोत्तरणप्रयोजना पठन प्रवृत्तिः नियंत्रणीया स्यात्, छात्रेषु संस्कृतभाषाग्रन्थानाम् भावग्रहणसामर्थ्यम् अभिव्यंजन-सामर्थ्यञ्च (तया भाषया) शिक्षणस्य प्रथमं साध्यं विधेयं स्यात्, संस्कृतविद्यामन्दिरेषु संस्कृतभाषायां व्यवहरणसामर्थ्यम् सुविकास्यं स्यात्, लोकशिक्षणसाधनेन सर्वथा सर्वदा नव्यभव्यप्राप्तिप्रेरणा तोष्या स्यात्।**

अन्ते संस्कृतस्य विकासमार्गे ये अवरोधाः दृश्यन्ते, तेषां परिहारः अस्माकं संस्कृतप्रेमिणां स्वल्पप्रयासेनैव भवितुं शक्यते। अस्मिन् प्रसंगे एकः श्लोकः स्मृतिमानेयः—

**विजेतव्या लंका चरणतरणीयो जलनिधिः**<br>
**विपक्षः पौलस्त्यः जलनिधि सहायाश्चकपयः**<br>
**पदातिमर्त्योऽसौ सकलमवधीत् राक्षसकुलम्**<br>
**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणैः॥**

संक्षेपे संस्कृतशिक्षणविकासोपायसंदर्शनक्रमे दिशो निर्देशनात् ऋते नाधिकं कथ्यं भवेत्— **सा च दिगस्ति लोकपेक्षानुसारिता। सर्वत्र प्रगतिदृष्टिः, सर्वत्र यथार्थदायिनी दृष्टिः, सर्वत्र भावाभिव्यंजनसामर्थ्य-प्रबोधिनी दृष्टिः भाषायाम् अस्याम् आत्मीयताविकासिनी दृष्टिः सर्वान्ते सर्वलक्ष्यीभूता अशेषे राष्ट्रे आत्मीयतादृष्टिः।**

देववाणी भवेदिष्टा भारतीयस्य सर्वथा<br>
पोष्या च सर्वभावेन सर्वकल्याणसिद्धये॥

—संस्कृताध्यापिका<br>
सर्वोदयकन्याविद्यालयः,<br>
आयानगरम्, नवदिल्ली-११००४७

# एकार्थीभावव्यपेक्षाभाववादिनां मतानि

—लीलाधर भट्टराई

समासे सामर्थ्यस्य महन्महत्त्वं विद्यते। तत्र सम्बद्धः सङ्गतः संसृष्टो वार्थः समर्थ इति। समर्थस्य भावः सामर्थ्यम्। तच्च सामर्थ्यं द्विविधं व्यपेक्षालक्षणम्[१] एकर्थीभवलक्षणञ्च[२]। तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्यः परस्परान्वयः तत् व्यपेक्षाभिधं[३] सामर्थ्यम्। विशिष्टा अपेक्षा व्यपेक्षेति व्युत्पत्तेः सम्बद्धार्थः समर्थ इति व्युत्पत्तेश्च। इदं च राज्ञः पुरुष इत्यादिवाक्य एव भवति। तत्र च एकैकस्य शब्दस्य यो यः सन्निहितो योग्यश्च तेन तेनान्वयो भवति। यथा राज्ञः पुरुषोऽश्वश्चेति, राज्ञो देवदत्तस्य च पुरुष इति ऋद्धस्य राज्ञः पुरुष इति च।

एकार्थीभवलक्षणसामर्थ्यं तु प्रक्रियादशायां प्रत्येकमर्थत्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। सङ्गतार्थः समर्थः संसृष्टार्थः समर्थ इति व्युत्पत्तेः। सङ्गतिः संसर्गश्च एकीभाव एव। यथा सङ्गतं घृतं तैलेनेति एकीभूतमिति गम्यते यथा व संसृष्टोऽग्निरिति। एकरभूत इति गम्यते इति भाष्याच्च। इदं च सामर्थ्यं राजपुरुष इत्यादिवृत्तावेव। अत एव ऋद्धस्य राजपुरुष इत्येवं राज्ञि पुरुषविशेषणे ऋत्त्वविशेषणं नान्वेति, विशिष्टस्य एकपदार्थतया 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति न्यायेन राज्ञः पदार्थैकदेशत्वात्। न चैवं देवदत्तस्य गुरुकुलमित्यादावनन्वयापत्तिः, तत्रापि देवदत्तोत्तरषष्ठ्यर्थस्य गुरुणाऽन्वयादिति वाच्यम्।[४] देवदत्तस्य प्रधानीभूतकुलेनैवान्वयात्। तत्र गुरुणा कुलस्य उत्पाद्यत्वसम्बन्धेनान्वयः। देवदत्तेन तु कुलस्य तदीयगुरूत्पाद्यतयान्वयो गुरुगर्भः। उक्तं च हरिणा—

**सम्बन्धिशब्दसापेक्षो नित्यं सर्वः समस्यते।**
**वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥**

अपि च—

**समुदायेन सम्बन्धो येषां गुरुकुलादिना।**
**संस्पृश्यावयवांस्ते तु युज्यते तद्वता सह॥**

एतेन 'अयः शूलदण्डाजिनाभ्यां ठक्ठञौ'[५] इति सूत्रे भाष्ये शिवस्य भगवतो भक्तः इत्यर्थे शिवभागवत इत्यादि व्याख्यातम्। एकार्थीभावश्चयमलौकिकविग्रहवाक्ये कल्प्यते। यथा लादेशभूतशतृशानचोः अप्रथमासमानाधिकरणेनार्थेनायोगादेशानुपपत्तिः तस्य क्वापि प्रयोगाभवादित्याक्षिप्य आदेशे समानाधिकरणं दृष्ट्वा अनुमानाद् गन्तव्यं प्रकृतेरपि तद्भवति इति 'लट्शतृशानचौ'[६] इति सूत्रभाष्ये समाहितम्। सिद्धानां शब्दानामन्वाख्यानत् पचन्तं देवदत्तं पश्येत्यादिप्रयोगदर्शनात् स्थानिनोऽपि लस्य प्रक्रियार्थं कल्पितस्य अप्रथमासमानाधिकरणमनुमीयते इति कैयटः अत्र प्रक्रियार्थं कल्पितस्येत्युक्त्या अन्यस्यापि प्रक्रियार्थं कल्पितस्य बोधकत्वकल्पना सूचिता। अलौकिकविग्रहवाक्ये श्रूयमाणानां च शब्दानां क्लृप्तशक्तित्यागे मानाभावात् प्रत्येकशक्तिसहकृतया समुदायशक्त्या विशिष्टोपस्थितिः। उक्तञ्चात्र भूषणसारे—

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।**
**बहूनां वृत्तिधर्माणां वचनैरेव साधने।**
**स्यान्महद् गौरवं तस्माद् एकार्थीभाव आश्रितः॥**[७]

ततश्च अयमेकार्थीभावः जहत्स्वार्थाऽजहत्स्वार्था चेति। तदुक्तम् 'समर्थः पदविधिः'[८] इति सूत्रभाष्ये—अथ तेषामेवं ब्रुवतां किं जहत्स्वार्थावृत्तिर्भवति, आहोस्विदजहत्स्वार्थाः? किं चातः? यदि जहत्स्वार्थावृत्तिः राजपुरुषमानयेत्युक्ते पुरुषमात्रस्याऽऽनयनं प्राप्नोति औपगवमानयेत्युक्तेऽ-पत्यमात्रस्य। अथाऽजहत्स्वार्थावृत्तिः उभयोर्विद्यमानस्वार्थयोर्द्विवचनं प्राप्नोति। का पुनर्वृत्तिन्याय्यः? जहत्स्वार्था। ननु चोक्तम् राजपुरुषमानयेत्युक्ते पुरुषमात्रस्याऽऽनयनं प्राप्नोति, औपगवयमान-येत्युक्तेऽपत्यमात्रस्येति? नैष दोषः जहदाप्यसौ स्वार्थं नात्यन्ताय जहाति यः परार्थविरोधी स्वार्थस्तं जहाति। अथवा पुनरस्तु अजहत्स्वार्थावृत्तिः ननु चोक्तम् उभयोर्विद्यमान-स्वार्थयोर्द्वयो-र्द्विवचनमिति द्विवचनं प्राप्नोतीति? कस्याः पुनर्द्विवचनं प्राप्नोति? प्रथमायाः। न प्रथमासमर्थो राजा। षष्ठ्यास्तर्हि प्राप्नोति, न षष्ठीसमर्थः पुरुषः। प्रथमायास्तर्हि प्राप्नोति। ननु चोक्तम्-न प्रथमासमर्थो राजेति? अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः। तत्र 'प्रातिपदिकार्थे प्रथमे'ति प्रथमाया एव द्विवचनं प्राप्नोति। संघातस्यैकार्थ्यान्नावयवसङ्ख्यातः सुबुत्पत्तिः। संघातस्यैकत्वमर्थः तेनाऽवयवसङ्ख्यातः सुबुत्पत्तिर्न भविष्यति, इति 'ईदूतौ च सप्तम्यर्थे'[९] इति सूत्रेऽपि अथ क्रियमाणऽप्यर्थग्रहणे कस्मादेवात्र न भवति? जहत्स्वार्था वृत्तिरिति। अथाऽजहत्स्वार्थायां वृत्तौ दोषः एव? अजहत्स्वार्थायाञ्च न दोषः समुदायाऽर्थोऽभिधीयते इत्युक्तम्। तत्र जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था इति व्यधिकरणपदको बहुव्रीहिः विवरणं भूषणसारे[१०]। जहति (शत्रन्तप्रयोगः) स्वानि=वृत्तिघटकीभूतपदानि यं स जहत्स्वः तादृशोऽर्थो यस्यामिति समानाधि-करणपदकोऽपि बहुव्रीहिः सम्भवतीति परे। पूर्वत्र विवरणे 'सप्तमीविशेषणे बहुव्रीहौ'[११] इति सूत्रे सप्तमीग्रहणाज्ज्ञापकाद्व्यधिकरणपदको बहुव्रीहिरिति बोध्यम्। क्रमेण द्वयोर्लक्षण्माह मञ्जूषायाम्[१२]—

अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वं जहत्स्वार्थात्वम्। अवयवार्थसंवलित-समुदायार्थबोधिकात्वमजहत्स्वार्थात्वम्। रथन्तरं सामभेदः शुश्रूषा सेवेति पूर्वस्या उदाहरणम्। राजपुरुष इत्यादावन्त्याः।

अत्रेदं तात्पर्यम्-परार्थाभिधानं वृत्तिः। तच्च यथा राजपुरुष इत्यादौ राजशब्दः पुरुषस्यार्थस्यापि पुरुषशब्दो राजशब्दस्यार्थस्यापि बोधकः। वाक्यावस्थायां तु राज्ञः पुरुष इत्यत्र राजशब्दः केवलं स्वार्थस्यैव बोधकः पुरुषशब्दश्च। तेनोक्तं परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र स वृत्तिरित्यर्थः। यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थयामनुक्तः पुरुषार्थोऽभिधीयते इति।

वस्तुतस्तु शब्दस्य नित्यत्वाच्छब्दे पदानि पदे वर्णा इव निरर्थकाः काल्पनिकाश्च। पदानि हि केवलं स्पष्टतयार्थबोधनायैव। तथा काल्पनिकत्वेन विभक्तानां पदानां तेषामर्थानाञ्चैकीभावतया एकार्थीभावो वृत्तिरित्युक्तम्। एवञ्च यद्यपि शब्दान्तरमेव वृत्तिः अवयवा वर्णवदनर्थकाः। सादृश्यात्तत्वाध्यवसायं पदानमाश्रित्य पृथगर्थानमेकार्थीभव इति। सा चैकार्थीभावरूपवृत्तिः प्राचीनमतानुसारेण कृत्तद्धितसमासैकशेषसनाद्यन्तेषु कल्प्यते। नव्यास्त्वेकशेषे वृत्तिं न मन्यन्ते, तत्रान्यशब्दार्थान्वितस्वार्थोपस्थापकताऽभावात्। लघुमञ्जूषायामपि वृत्तेश्चातुर्विध्यमेवोक्तं यथा-वृत्तिश्चतुर्धा, समासतद्धितकृत्सनाद्यन्तधातुभेदादिति। सा च वृत्तिर्द्विधोक्ता जहदजहत्स्वार्थभेदात्। तत्र पदानि यत्र स्वार्थं जहति सा जहत्स्वार्था, यथा रथन्तरमित्यादौ। पदमिदं हि अवयवभूत-

रथतृखजर्थमुपेक्ष्य सामविशेषं बोधयति। एवमेव शुश्रूषा इति अवयवार्थभूतश्रवणेच्छारूपकमर्थमुपेक्ष्य सेवारूपार्थं बोधयति। महाभाष्यकारेणाप्युक्तम्।[१३] यः परार्थविरोधीस्वार्थस्तं जहाति इति।

यत्र तु पदानि स्वार्थं न जहति अपितु तत्संवलितावयवार्थं बोधयन्ति साऽजहत्वस्वार्थाः यथा राजपुरुष इत्यादौ। ता हि राजपुरुषशब्दो सम्भूय स्वार्थसंवलितराजसम्बद्धपुरुषरूपं समुदायार्थं बोधयतः। तत्र जहत्स्वार्थायामेकार्थीभावः अजहत्स्वार्थायां तु व्यपेक्षैव। 'समर्थः पदविधिरिति सूत्रे समर्थपदमेकार्थीभावसामर्थ्यस्यैव बोधकमिति। तेनैकार्थीभावसामर्थ्ययुक्तपदयोः पदानां वा समास इति बोध्यम्।'

**व्यपेक्षाभाववादिनां मतानि**

व्यपेक्षावादिनो हि नैयायिकाः मीमांसाकाश्च एकार्थीभावलक्षणसामर्थ्यं न स्वीकुर्वन्ति। अर्थात् समासे शक्तिर्नास्ति तन्मतानुसारेण। राजपुरुष इत्यादौ तु राजशब्दस्य लक्षणया राजसम्बन्धवदभिन्न इत्यर्थबोधात् पुरुषेणान्वयः राजशब्दस्येत्थं पदार्थैकदेशत्वान्न तत्र ऋद्धस्येत्यादि विशेषणान्वयः। यतो हि **पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति।** नैव च घनश्यामः निष्कौशाम्बिः गोरथ इत्यादीनामप्रयोगात्, नापि 'विभाषा'[१४] इति पाणिनीयं सूत्रमेवावश्यकं तत्र लक्षणाय राजसम्बन्ध्यभिन्न इति कथनाय समासस्य राजसम्बन्धवान् इति कथनाय विग्रहस्यैव सम्भवान्न विभाषाकरणावश्यकतेति।

अपि चोच्यते तार्किकैः पङ्कजशब्दवतसमासेऽपि समुदाये शक्तिरिति यदुच्यते तन्न। पङ्कजपदे तु तङ्क+जन+ड इत्यवयवभूतार्थज्ञानं विनापि कमलमित्यर्थबोधात्तत्र समुदाये शक्तिः किन्तु राजपुरुष इत्यादौ तु अवयवार्थशक्तिग्रहं विना लक्षणया विशिष्टार्थबोधसम्भवात् राजपदादिशक्त्यग्रहे न राजपुरुष इत्यादिषु राजसम्बन्ध्यभिन्नः पुरुष इति शब्दबोधसम्भव इति।

चित्रगुरित्यादौ चित्रा गौर्यस्येति षष्ठयर्थबहुव्रीहित्वेन लक्षणासम्भवेऽपि षष्ठ्यर्थभिन्नस्थले तु न लक्षणासम्भवस्तथासत्यनेकनियमविरोधादिति न वाच्यं प्राप्तोदक इत्यत्र प्राप्तमुदकं यं स इति षष्ठयर्थेतरबहुव्रीहिवापि उदकपदे लक्षणास्वीकारात्। पूर्वपदभूतस्य प्राप्तशब्दस्य तु यौगिकत्वेन तत्र प्र+आप्+क्त इति धातुप्रत्ययतदर्थज्ञानगम्यतया विलम्बेनैव लक्षणाप्राप्तेः। अपि च प्रत्ययो हि सन्निहितपदार्थसम्बद्धस्वार्थं बोधयतीति उदकपदेनैव तदर्थज्ञापनाच्चेति। प्रत्येकं वर्णानां वाचकत्वेऽपि घटादिपदे चरमवर्णस्यैवार्थबोधकत्वसमर्थनाद् विशिष्टे एवातिरिक्ता शक्तिः विशिष्टे एव सङ्केतग्रहसम्भवात्। प्राप्तोदक इत्यत्रापि नितान्तनैकट्येन प्रत्ययान्वसौलभ्यायोत्तरपदे एव लक्षणेति सारमिति तार्किकादीनाम्मतम्।

अत्रोच्यते शाब्दिकैः—

यदि हि व्यपेक्षापक्षमाश्रित्य समासे शक्तिर्नैव स्वीक्रियते तदा समुदायस्यार्थवत्ताभावेन तस्य प्रातिपदिकत्वमेव न स्यादर्थवत एव तन्नियमात्। राजपुरुष इत्यत्र व्यपेक्षावादिमते प्रत्येकमर्थत्वेऽपि समुदायस्य दशदाडिमादिवदर्थहीनत्वान्न प्रातिपदिकत्वप्राप्तिः 'कृत्तद्धितसमासाश्चेति[१५] सूत्रे समासग्रहणं नियमार्थमेव।'

नियमस्तु सिद्धिमनुसृत्यैव भवति तेन राज्ञः पुरुष इत्यादेर्न प्रातिपदिकत्वम्। किञ्च समासे शक्त्यस्वीकारे अवयवानां सार्थकत्वेऽपि विशिष्टस्य (समुदायस्तु) अर्थवत्त्वाभावेन शक्यार्था–

भावान्नहि तत्र शक्यसम्बन्धरूपलक्षणाया अपि प्रवृत्तिरिति नहि तस्य लाक्षणिकार्थवत्तयाऽप्यर्थवत्त्वं यतः स्वाद्युत्पत्तिः स्यात्। तथा सति अपदस्य प्रयोगनिषेधात् सर्वेऽपि प्रयोगा व्यवहारबाह्याः स्युः।

अपि च समासे शक्त्यभावे विशिष्टेऽर्थवत्ताभावेन प्रातिपदिकत्वाभावादपदत्वेन प्रयोगविलय आपद्यते तदा भाष्यसिद्धं ति इत्यारभ्यः सुपः पकारेण तिप्प्रत्यहारमाश्रित्य तत्पर्युदासेन 'अतिप्प्रतिपादिकमितिसूत्रं पठ्यतां तस्यार्थः सुपतिङ्भिन्नं प्रातिपदिकमिति। ततश्च 'कृत्तद्धित-समासाश्च'[१६] इति सूत्रं नियमार्थमस्तु इति कथ्यते चेत्सत्यमेव, किन्तु प्रत्येकं वर्णेषु तन्निवाराणाय सूत्रे अर्थवत्त्वग्रहणमावश्यकमेव येन समासे सैव स्थितिः। प्रातिपदिकत्वकार्यं स्वयमेवार्थवत्त्वं ज्ञापयति। यदेवार्थयुक्तं तदेव प्रातिपदिकमिति। समासोऽप्यर्थवान् प्रातिपदिकत्वात्। नार्थहीनं प्रातिपदिकं यथा अभेदपक्षे भूसत्तायामित्याद्यनुकरणशब्द इति।

यदुक्तं 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन तथैव वृत्तस्य विशेषयोगे'त्यपि तत्तु लाक्षणिकार्थापेक्षया समासे एकार्थीभावेऽवयवानां पृथगर्थाभावेन विशेषणयोगासम्भवात् तत्र फलितं भवति न तु भवत्सम्मते व्यपेक्षावादिमते। भवतान्तु (नैयायिकानां तु) अपूर्वनियमकल्पनमिति गौरवमेवेति।

न च तार्किकादिसम्मतं प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधत्वमेवोपयुक्तं तथा सति उपकुम्भमित्यत्र समीपार्थे अर्धपिप्पली इत्यत्र अर्धार्थे च विभक्त्यर्थान्वयः स्यात्। न च तदभीष्टम्। अस्मत्पक्षे तु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् तेषां समुदायोत्तरमेवोत्पत्तेः समुदायस्यैव प्रकृतेरर्थवत्त्वाच्च न दोष इति।

यदि राजपुरुष इत्यत्र लक्षणा स्वीक्रियते तदा किं सा राजपदादेः सम्बन्धिनि उताहो सम्बन्धे वेति प्रश्नः न हि सम्बन्धिनि लक्षणा सम्भवति, तथा सति तस्य राज्ञः पुरुष इति विग्रह एवासिद्धः स्याद्, वृत्तिसमानार्थवाक्यस्यैव विग्रहत्वं सम्भवति न हि राज्ञः पुरुष इति विग्रहस्य राजसम्बन्धी पुरुष इत्यर्थस्य च न समानार्थकत्वम्। विग्रहविग्रह्यमाणयोः समानार्थकत्वाभावे ततः शक्तिनिर्णयोऽपि न स्याद् यद्धि नितान्तमभीष्टम्। यदि हि वृत्तिसमानार्थकवाक्यस्यैव विग्रहत्वं तदा वैयाकरण इत्येतस्य व्याकरणमधीते इति पाचक इत्यस्य पचति इति च कथं विग्रहो वृत्तिसमानार्थत्वाभावादिति चेदुच्यते कृदन्ततद्धितान्तप्रयोगयोर्विग्रहवाक्यगतमाख्यातं यत्किञ्चिदेव विगृह्यमाणस्यार्थबोधकं भवति न तु सर्वांशतः। कृदन्ततद्धितान्तप्रयोगयोराश्रयस्य (कर्तुः) प्राधान्यं व्यापारस्य गौणता आख्याते तु व्यापारस्य प्राधान्यमाश्रयस्य गौणतेति। तेन तथाविधस्थले न दोष इति।

नहि रथन्तरशब्दाद् रथिकस्यापि बोधो भवति रूढिर्योगार्थमपहरतीति न्यायात्। पङ्कजशब्दात् न च अवयवार्थमनपेक्ष्य समुदायार्थमात्रबोधोऽपि न तत्र रूढिर्विरोधिनी तत्रैव जहत्स्वार्थायां विषयत्वादत्र तु न तथेति। चतुर्विधो हि शब्दः रूढ-यौगिक-योगरूढ यौगिकरूढभेदात्। तत्र अवयवार्थमनपेक्ष्य समुदायार्थबोधकत्वं रूढत्वं यथा रथन्तरमिति। यत्र चावयवार्थसंवलित-समुदायार्थबोधकत्वं योगरूढत्वं यथा पङ्कजमिति। यत्र चावयवशक्त्यैवार्थबोधकत्वं तद्यौगिकत्वं यथा पाचक इति। यत्र चावयवशक्त्या समुदायशक्त्या चार्थबोधकत्वं यौगिकरूढत्वं यथा मण्डपशब्दो मण्डपानकर्तरि भवनविशेषेऽर्थे चेति।

पङ्कजशब्दे इव समासे अवयवार्थेतरा समुदायरूपा शक्तिः। यदि पङ्कजशब्दे योगार्थः स्वीक्रियते तदा तस्माच्छैवालादेरपि प्रतीतिः स्यात् तेषामपि पङ्कजन्यत्वात्। समासे विशेषण-लिङ्गसङ्ख्याद्ययोगः एकार्थीभावे न्यायसिद्धः व्यपेक्षा पक्षे तु वचनं कर्तव्यम्। विशेषणयोगो यथा राजपुरुष इत्यत्र ऋद्धस्येत्यदिविशेषणयोगः लिङ्गायोगो यथा-कुक्कुट्या अण्डं कुक्कुटाण्डं, मृग्याः क्षीरं मृगक्षीरम्। संख्यायोगो यथा राज्ञः राज्ञेर्वा पुरुषः राजपुरुष इति। लाघवार्थमपि एकार्थीभाव आश्रयितव्य इति।

एवञ्च व्यपेक्षावादिमते घटपटावित्यत्र चकारनिषेधः घनश्याम इत्यत्र इवशब्दनिषेधश्च। एवमेवान्यत्रापि तत्पक्षसिद्धये बहुविधव्युत्पत्तिभञ्जनञ्च कर्तव्यम्। एकार्थीभावपक्षे तु सर्वस्य न्यायसिद्धत्वान्न तथादोष इति। घटपटावित्यत्र लक्षणया साहित्यबोधे चकारनिषेधः कर्तव्यः। एकार्थीभावपक्षे तु साहित्याद्यवच्छिन्ने एव शक्तिस्वीकारात् स्वत एव तन्निवृत्तिरुक्तार्थानां प्रयोगनिषेधात्। प्राप्तोदक इत्यस्य उदककर्तृकप्राप्तिकर्मग्राम इत्यर्थः किन्तु व्यपेक्षावादिमते पृथक्शक्तिस्वीकारात् कर्त्रर्थे कृतास्य क्तप्रत्ययस्य कर्मार्थे लक्षणा कर्तव्या भवति। ततोऽपि नामार्थयोरभेदान्वयव्युत्पत्त्या उदकाभिन्नं प्राप्तिकर्म इत्येव बोधो भवति। यदि उदकस्य कर्तृत्वेन प्राप्तावन्वयः क्रियते तदा नामार्थयोरभेदान्वय इति व्युत्पत्तेर्भञ्जनं स्यात् एकार्थीभावपक्षे तु विशिष्टस्यैव विशिष्टार्थवाचकत्वात् द्वयोः प्रातिपदिकार्थयोरभावान्न स दोष इति।

---

**सन्दर्भग्रन्थ—**


१. परस्पराकाङ्क्षारूपा व्यपेक्षा। महाभा० २.१.१ प्रदीपः

२. यत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपानाद् व्यर्थानि अर्थान्तरभिधायीनि वा स एकार्थीभावः। महाभा० २.१.१ प्रदीपः

३. पा०सू० २.१.१ तत्त्वबोधिन्याम्

४. पा०सू० २.१.१ तत्त्वबोधिन्याम्

५. पा०सू० ५.२.७६

६. पा०सू० ३.२.१२४

७. वै०भू०सा० कारिका ३१.२२

८. पा०सू० २.१.१

९. पा०सू० १.१.१९

१०. वै०भू०सा० समासादिवृत्यर्थे

११. पा०सू० २.२.३५

१२. प०ल०म० समासादिवृत्त्यर्थे

१३. महाभा० २.१.१

१४. पा०सू० २.१.११

१५. पा०सू० १.२.४६

१६. पा०सू० १.२.४६



—शोधच्छात्रः,

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,

कटवारियासरायः, नव दिल्ली-११००१६

# रत्नावल्यां नाट्यतत्त्वम्

**—डॉ० सुमन कुमारी**

शास्त्रीयपद्धतिमाश्रित्य विरचितेषु दृश्यकाव्येषु हर्षवर्द्धनस्य 'रत्नावली' एकं श्रेष्ठं काव्यमस्ति। तच्छ्रेष्ठतायाः कारणमस्ति तत्रोदाहरणानां संख्याधिक्यं यत् कस्यचन् रूपकस्य विशिष्टतायाः प्रदर्शनाय अपेक्षितम्।

रत्नावली नाट्यकला दृष्ट्यैव नोत्तमा अपितु काव्यदृष्ट्यापि सा अभिनन्दनीया कृतिर्वर्तते। नाटिकाकारेण तत्प्रणयने अद्भुतं कौशलं दर्शितं येन तत्र शास्त्रीयपद्धति विषयकं सौन्दर्यं कलात्मकं च मृदुललालित्युभयमपि नितरां मनोऽभिरामंभुत्वात्मानमुस्थापयितुं क्षममस्ति। कुशलकलाकारस्य तूलिका मनः प्रीतिकरैः वर्णैरालेख्यस्य रूपे नैसर्गिकीमाभां किरन्ती प्राणान् प्रवाहयति। न कलाकरः शास्त्रीयान् सिद्धान्तानुपेक्षते। स तेषु रमते, ते च तस्मिन् रमन्ते। कलाकारस्यैतद्धिनिखिलं वैशिष्टयं दृग्गोचरीभवति हर्षे अत एव शास्त्र प्रतिवादित सन्ध्यङ्क्रमविधानं स रत्नावल्यां यथाविधि संरक्षन् दृश्यते। मुखसन्धेर्द्वादशस्वङ्केषु करणमेकादशमङ्कं वर्तते विलोमन चतुर्थपरं रत्नावल्यां प्रथमं करणमङ्कितम्—''नमस्ते भगवन् कुसुमायुध अमोघदर्शनो मे इदानीं त्वं भविष्यसि। ततश्च तत्र विलोभनम्—

**''अस्तापास्तसमस्तभासि नभसः पारं प्रयाते रवा**
**वास्थानीं समये समं नृपजनः सायन्तने सम्पतन्।**
**सम्प्रत्येष सरोरुहधुतिमुषः पादांस्तवासेवितुं**
**प्रीत्युत्कर्षकृतो दृशामुदयनस्येन्दोरिवोद्वीक्षते॥''** —१-२४ रत्नावली नाटिका

अत्र विलोमनेन सहोद्भेदाभिधमपि संन्ध्यङ्क विभाति। कलाकारः स्वतन्त्रः भवति। तत्र राजमाना स्वातन्त्र्य प्रियता वस्तुतः कलां धवलयति। असंशयं हर्षे कलाकारस्त्वन्वर्थतां याति।

अर्थप्रकृतयः, कार्यावस्थाः, सन्धयश्च सन्तिवस्तु विकासनस्य साधनानि। हर्षो रत्नावल्यां तत्-तत्-साधनानि सम्यक् प्रयुञ्जानः प्राप्यते। रत्नावल्याः कथावस्तुनः प्रधानं ध्येयमस्ति रत्नावल्युदयनयोरुद्वाहः। कविता विष्कम्भके यौगन्धरायणस्य—

**''द्विपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।**
**आनीय झटिति घटयति विधिरमिमतमभिमुखीभूतः॥''**

इत्येतयोक्त्या साध्यस्य बींज स्पष्टमेव निर्दिष्टम्। एतस्मादुपरितनाच्छ्लोकात्—

**''प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ दैवेनेत्थं दैववेनेर्थं दत्त्हस्तावलम्बे।**
**सिद्धेर्भ्रान्तिर्नास्ति सत्यं तथापि स्वेच्छाचारी भीत एवास्मि भर्त्तः॥''**

—रत्नावली नाटिका १-८

इत्येतच्छलोकं यावद् बीजरूमेणोपस्थापयति कविः। यौगन्धरायणस्योक्तिरेवारम्भावस्थां समुपन्यस्यति। बीजाभिधाया अर्थप्रकृतेः आरम्भावस्थायाश्चान्वयो विधीयते मुख्सन्धावेव। अथ च मुख सन्धावेव बीजस्योद्भव उद्देश्यानां संस्तवः फलप्रोत्साहनादिकचनिरूप्यन्ते। एतेषां

सद्भवो रत्नावल्याः प्रथमेऽङ्के विद्यते तस्मात् तत्र् मुखसन्धिरेव परिस्फुटति।

**''सम्प्रत्येष सरोरुहद्युतिपुषः पादांस्तवासेवितुम्॥''** (रत्नावली नाटिका)

इत्यादिकां वैतालीयां गिरामाकर्ण्य सागरिका ''कहं अअं सो राआ सो राआ उदअणो जस्स अहं तातेय दिज्जा''........इत्यादिकं यदभिधाति तत् तन्मानसे प्रादुर्भूतं प्रेमाभिव्यनक्ति कथाविकासने च तज्जायते साहाय्यकृत्। कविरित्थमिह अर्थप्रकृति विन्दुमुपक्षिपति। सागरिकोदयनमलिखितुं यद् यतते तदेव प्रयत्नाख्या कार्यावस्थास्ति। विन्दुप्रयत्नयोः संगतिः प्रतिमुखसन्धिमध्ये भवतिं रत्नावल्यां द्वितीयाङ्के प्रतिमुखसन्धिरेवातो विद्यते। रत्नावल्या नाटिकात्वात् तत्र पताकाप्रकार्योः सन्निवेशो नापेक्ष्यत् इत्येतद् विमृश्यता कविना ते प्रदर्शिते। ते बिना शास्त्रीय तापि नापकर्षमुपैति तस्मात् तदनुपस्थापनं न कामपि हानिं जनयति। तृतीयाङ्के रत्नावली (सागरिका) परिवर्त्य, राजानं संगन्तुमभिसरणोपायमवलम्बते परं न वर्तते स उपक्रमो निरापदः।' वासवदत्ता तमुपाय व्याहन्तं शक्नोति। भवति च स उपायो व्याहतः। राजा यद्यपि तत्राकस्मादेव सागरिकामवाप्नुते परं तदवाप्ति समये ''भो एवं ण्णेदं जदि अ आला वादावली ण आ आदि देवी-वासवदत्ता'' इत्येतदभिधाय विदूषको हि वासवदत्ताया आगमनाशङ्कामप्युत्पादयति इत्येतद्विधायाः स्थितेर्विद्यमानत्वात्, तृतीयाङ्कः प्राप्त्याशमिधावस्थां भजते। तथाविधत्वात् तत्र गर्भसन्धिः समुपतिष्ठते। देवी प्रसादनं मुक्त्वा नान्यमुपायं पश्यामि—इत्यादिकानि वचनानिफल-प्राप्तिं सङ्केतयन्ति। कविना नियताप्ति-अवस्थामेव दर्शयितुं हि तद्विषयकः तक्रमः समुपन्यस्त। चतुर्थेऽङ्के हि अग्निबाधा-पर्यन्तं रत्नावल्याः प्राप्तिः सप्रत्यूम् प्रदर्शितास्ति परमन्ते 'तदवाह्यवसरे विघ्नविहीनश्च समुपस्थापितः। एतत् सर्वं चतुर्थस्याङ्कस्यावमर्श सन्धिमत्त्वं प्रथयति। तस्मिन्नैव चतुर्थेऽङ्के सिंहलेश्वरस्य सचिवो वसुभूतिः सागरिकां निर्वर्ण्य वाभ्रव्यं सदृशीय राजपुत्र्या बाभ्रव्य'' इति यद् व्याहरति तस्यतद्व्याहरणान्निर्वहणसन्धिः समारब्धो भवति। यौगन्धरायकृते सर्वरहस्योन्मीलने रत्नावली परिग्रहीतुमुदयनम्प्रति वासदत्ताविहितेऽभ्यर्थने च फलावाप्तिः स्फुटतयैव दर्शकानां समक्षेऽवतरति। अतश्चतुर्थोऽङ्कः उपसंहृतसंधिः उच्यते। कथावस्तुनिचमत्कारमवतारयितुं नाटिकाकारेण पताकास्थानकानामपि प्रोयगोऽस्ति कृतः। धनञ्जयेन अन्योक्तिरूपं पताकास्थानकमथ च समासोक्तिरूपं पताकास्थानकमित्येतद् द्वयमेव प्रतिपादितम्। कविनानयोर्द्वयोर्द्मपोरपि सन्निवेशो विहितः स्वरचनायाम्। ''यातोऽस्मि पद्मनयने'' इत्यादौ अन्योक्तिरूपं पताका स्थानकं किञ्च ''उद्दामोत्कलिकां विपाण्डररूचम्'' इत्यादौ समासोक्ति रूपं च पताकास्थानकं शोभमानं पश्यन्ति भावुकाः। इदं सर्वं नाटिकाया अस्याः शास्त्रीय पद्धत्यनुगामित्वं द्योतयति।

नाटिकाकारः प्रस्तावनानंतरं विष्कम्भकद्वारेण नाटिकायाः कथासूत्रस्य पूर्ववर्तिनोंऽशस्यभासमात्रं करोति। स च अंशोऽयम्-सहलेखकरस्य सुता रत्नावली यः परिणेष्यति सः चक्रवर्तित्वमवाप्स्यति इत्येतज्ज्योतिर्विदभ्यो कौशांबीश्वरसेनस्य मन्त्री रत्नावलीमुदयनार्थ सिंहलेश्वरं याचते परं सिंहलेश्वर उदयनस्य वासदतत्तराज्ञीक्त्वात तस्या तां प्रार्थनां प्रत्यदिशति। ततोयौगन्धरायणो ''लावाणके गामेऽग्निना वासदत्त उद्यत''—इत्येतमनृतमुदन्तं वितयोदयनस्य कृते सिंहलेश्वराद् रत्नावल्या अधिगमनेऽधिगच्छति साकल्यम्। परं दैवाद् रत्नावलीवाही पोतोऽर्णवे निमजाति। फलकेनैकेन सांयात्रिका उद्धरन्ति रत्नावलीम्। आनीता च सा योगन्धरायणस्य सविधे भवति। यौगन्धरायणस्तां

सागरिके त्येतन्नाम्ना प्रख्याप्योदयनस्यावरोधे देव्या: वासवदत्ताया: सेवायां नियुक्ति येनोदयन: स्यादाकृष्टस्तां प्रति। रत्नावलीकथा अत: प्रभृति आरब्धा भवति।

नाटिकाया: प्रथमेऽङ्के मदनमहोत्सवस्य दर्शनीयं दृश्यं समुपस्थितं भवति। सागरिका तस्मिन्नेव कमनीयेसदवसरे उदयनदर्शनस्य पुण्यमयीं प्रच्छन्नायां दशायाम्। तद् घृदये प्रणय-बीज मुप्त्वा प्रथमोङ्के भवत्यवसित:।

द्वितीये अङ्के उदयनविरहताप-तप्ता सागरिका स्वमनोविनोदाय राजानमलिखन्ती वीक्ष्यते तत्सखी सुसंगतोदयनवियोगवह्निदह्यमानां तामुपचन्ती समुपलभ्यते। राज्ञ उदयस्यापि दृक्-पथे सागरिकाऽलिखितं तच्चित्रं, सुसङ्क तथा समं सागरकापि आलिखितासीत्, अवतरति। चित्रं वीक्ष्य नृप: सागरिकमायामनुरज्यति। सुसङ्गताया: प्रयलेन सागरिकोदयनयो: सान्निध्यमपि सञ्जायते। संयोगवशात् तच्चित्रं वासवदत्तादृष्टिगतं भवति। चित्रं विलेक्य वासवदत्ता कुप्येदिति विचार्य्य नृप: चिन्तां प्रतिपद्यते-इत्येतत् प्रदश्यं द्वितीयाङ्कोऽपि संवृततामुपैति।

सागरिकोदयनयोर्मेनलनार्थं कृताया: योजनाया वासवदत्तावगतत्वात् सर्वमपि समीहितं वैयर्थ्यं याति। राजा वासवदत्ताया: पुरस्तादभृशं जिह्वेति। राजानुनयति। परं न तस्या रोषो दूरीभवति। यदैषा सर्वापि स्थिति: सागरिका श्रुर्तिपद्यते तदासात्यन्त दूयते भवति च सा आत्मानं व्यापादयितुमुद्यता परं भगवदनुकम्पया न सा दुर्घटना घटते वासवदत्ताकोप उभावपि सागरिका-विदूषकवसन्तकौ स्वशरव्यतां नयति। राज्ञो वेदनां चिन्ताञ्च वर्धयन्नङ्कस्तृतीय: समाप्तिमेति।

राज्ञी वासवदत्ता सागरिकां वन्दिनी विधाय निगूहयति क्वापि ताम्, अथ च प्रचारयति यत् सा उज्जयिनी प्रस्थापिता। तदीया रत्नमाला कस्मैचन भूदेवाय देया स्यादित्यैतानम् तत्कृतामाकाङ्क्षां ज्ञात्वापि सुसंगता तां (रत्नमालाम्) विदूषकायैव प्रयच्छति। विदूषकस्तया रत्नमालया राजानां रञ्जयितुमीहते। इतो राजानं विजयवर्मा 'रूपण्वता मन्त्रिणा कोशलेषु विजयोलब्ध' इत्येतेन शुभेन वृत्तान्तेन प्रीणयति। एतस्मिन्नेवान्तराले काचनमालाऽऽहृत: कश्चन ऐन्द्रजालिक: स्वकीयेन्द्रजालविद्याया: कौतुकं वितनोति। वासवदत्तासहितो भूपतिर्यदा तत्कौतुकजनितमानन्दं गाहमानो राजभवनमध्यास्ते स्म तदैव वाभ्रव्यो नाम कञ्चुकी यो रत्नावलीमनेतुं सिंहलद्वीपं गत आसीत् किञ्च सिंहलेश्वरस्य मन्त्री वसुभूतिर्यो रत्नावल्या साकामागच्छन् पोतस्य निमग्नत्वाज्ज-लधावपगहितोऽभूत्, आगता:। तौ विदूषकस्य ग्रीवां सागरिकाया: रत्नमालायाङ्कतां प्रेक्ष्य 'इयन्तु रत्नमाला रत्नावल्या: प्रतीयते' इति शङ्कते। वसुभूतिर्वासवदत्तदहनसम्बन्धिघटनोदन्त-मारभ्य जलयान-निमग्नता-रत्नावली प्लावनादिविषयक-सकलमपि व्यतिकरं श्रावयति राजानाम्। राजापि यदा तत् सर्व: शृण्वन्नासीत् तदैवान्त: पुरेऽग्निज्वाला: प्रसरन्त्यो दृष्टा भवन्ति। विलोक्यग्निना दह्यमानमन्त:पुरं वासवदत्ता भीता भवन्ती तत्र वन्दिनीतेन स्थितां सागरिकामग्ने: पातु सोद्वेगं नृपं प्रार्थयते। राजापि तत्क्षणं सागरिका जीवनरक्षार्थमग्नावेव प्रविशति। वासवदत्ता-विदूषक-वाभ्र-व्य-वसुभूतयश्च महीपमनुधावन्ति। परं सागरिकोद्धारेणैव सह अग्निरपि शाम्यत्यकस्मात्। वस्तुत: स: अग्नि नरेन्द्र जालिककौतुकमेवासीत् नासीत् परमार्थतोऽग्नि:। वसुभूति-ब्राभ्राव्यौ 'सा सागरिका तु तत्त्वतो रत्नावल्ये वे'ति विज्ञाय नितरां प्रीयेते। तस्मिन्नेवानेहसि यौगन्धरायण: सर्वमपि रहस्यमुन्मीलयन्ति। राजा सर्वमपि तन्निशम्यविस्मयं हर्षञ्च विन्दति। वासवदत्ताया: कृतेन

सविनयेनानुरोधेन च नृपो रत्नावलीं पत्नीत्वेन परिगृह्णीते इत्येतत् सर्वमपि वस्तुजातं निधाय भरतवाक्येन सह नाटिका भवत्युपसंहृता।

निःसंशयं नाटिकायां कथावस्तु नितान्तं सुघटितं सत् युक्तियुक्ताया रीत्या विकासमभ्युपैति। नाटिकाकारेण हर्षेण स्वकीयया निशितया प्रतितया मनोभिरामया च कल्पनाया तासां ललितललिततराणां घटनानां योजनास्ति विहिता याः नैसर्गिकतां चमत्कारितां च परिष्वजमानाः कथायां कामपि रूचिरां तूर्णां च गतिं सञ्चारयन्ति। सारिकया सागरिकासुसंगतयोरालापस्य पुनरावर्तनं यत् कविना कारितं तेन च उदयनस्य स्वान्ते सागरिकापरकप्रेमाविर्भावनस्य या प्रभावपेशला कान्तभावनोद्भावितातत् पुनरावर्तनं साय भावनां नाटिकामतितरा गतिमीं विदधाते। एवमेव नाटिकायां सागरिकाभिसारसम्बन्धिनी किञ्च तदभिसरणोविषयिका च या घटना समुल्लसति ते द्वे अपि घटने हर्षस्य हृद्यायाः कल्पनायाः परममञ्जुलनिदर्शनत्वेन विभासेते। ऐन्द्रजालिक-उद्भावना तु आनन्दपूर्णमद्भुतं वातावरणं सृजन्ती अनिर्वचनीयायामुल्लासवत्यां भासुरायां भूमिकायां नाटिकां संवृणुते।

नाट्यशास्त्रस्य विधानमिदं यन्नाटिकायाः नायको धीरललित आलिख्येत। तत्र प्रणय-लीलाः प्रदर्श्येरन्। एतद्विधानान्नाटिकायां प्राधान्यं शृङ्गारस्य भवति।

रत्नावल्यामतएव हर्षेण तत्सर्वमनुसृतं यन्नाट्यशास्त्रमादिशति। प्रथमाङ्के कविर्वसन्तोत्सवस्य कन्दर्पस्याचार्याश्च प्रियं दृश्यं शृङ्गाररसानुगुणवातावरणप्रतिष्ठापन्पूर्वकमारचयति। वासवदत्तोदयनयोः स्पृहणीयं प्रेम तु तस्मिन् रमणीयोपक्रमे जीवनमेव सञ्चारयति। कविर्नाटिकां सागरिकायाः उदयनस्य च प्रणयावनेरूपरि प्रतिष्ठापयति। तत्र शृङ्गारस्य संयोग विप्रलम्भाभिधौ द्वावपि पक्षौ साफल्यपूर्वकं चित्रितौ दृश्येते। प्रेमोदयो गुण-श्रवण-चित्रदर्शनादिनाजायते-इत्येतत्कारणात् तत्सर्वमपि नाटिकायां कुशलः कलाकरः समीचीनतया निबध्नाति।

शृङ्गारे हावस्यास्ति नैजं महत्तम्। नायकं परकीयाया अभिसारिकाया वा हावाः भृशं प्रीणन्ति परमेतस्यां नाटिकायामभिसरणस्यप्रत्यक्षतयोपस्थापितत्वात् हावा नात्मानमभिनेयतायां परिणमयितुं क्षमन्ते। तथात्वेऽपि उदयनस्यानयो क्त्यावश्यं ते आस्वादविषयतां नीताः सन्ति।

**''प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता।''**[६]
**घटयति घनं कण्डाश्लेषे रसान्न प्योधरौ।**
**वदति बहुशो गच्दामीति प्रयत्नधृताप्यहो**
**रमयतितरां सङ्केतस्था तथापि हि कामिनी।** (रत्नावली ३/८)

एतस्यां नाटिकायां शृङ्गारोः आस्वाद्योऽस्त्येव सर्वत्र परमन्येऽपि रसा अनेके तत्र तत्रास्वाद्यन्ते सहृदयैः। सहृदय जगत् ''अस्त्रव्यस्तशिरस्त्रकृषणैः.......शरशतैर्मत्तद्विपस्थोहतः'' इत्येतस्मिन् श्लोके वीररसमास्वादयति। तत्र चास्यां नाटिकायां भयानकरस आस्वाद्यतां याति तत्र कविरुन्मुक्तो भूत्वा सर्वत्र सम्भ्रमं वितनुते किञ्च यदाग्निः प्रासादे प्रसरित तत्र करुणरसो रसिकान् परिप्रीणयन्नुदेति यत्र वसुभूतितो रत्नावल्याः सागरे निमग्नत्वं निशम्य मृदुलमानसा वासवदत्ता रोदितुमारभते। इत्थमस्यां नाटिकायां सत्यपि प्रधाने शृङ्गारे रसान्तराणामपि श्रेष्ठाभिव्यञ्जना कृतस्ति कविना।

नाटिकाया भाषा सरला अप्रतिहतप्रभाग सुललिता च वर्तते। न तत्र दुरूहाणि पदानिसन्तिः

न च समासबहुलता सर्वथैव तत्र रसानुरूपतास्ति। वाक्यानि न सन्ति तत्र दीर्घद्दीर्घतरोणि। तत्रत्य: प्रसादो माधुर्य्यं च कालिदासं स्मारयति। नास्ति कवे: शैली भवभूति भट्टनारायणयोरिव कृत्रिमा। तस्य शैल्या विशिष्टतेयं यत् यत्र चित्रात्मकानां ध्वन्यात्मकानाञ्च पदानां प्रयोगोऽभिमत्। नाटिकायां नाट्यकलाया: काव्यकलायाश्चोभयोर्मञ्जुलतया समन्वय: सजातोऽस्ति। तस्माद्रत्नावली सर्वथैवकाम्यतमा सफला श्रेष्ठा च कृतिरिति शम्।

—सहायकाचार्य: (साहित्यम्)
संस्कृत विभाग:
डॉ० रामजी मेहता आदर्श संस्कृत महाविद्यालय:,
मालीघाट:, मुजफ्फरपुरम्, बिहारप्रदेश:
सम्पर्क सूत्र—09852952966

# शैवविशिष्टाद्वैतवेदान्तस्य मौलिकता

**—शंकरदत्तः ( शोधछात्रः )**

''**सा विद्या या विमुक्तये**'' इति श्रुत्या धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयेषु मोक्ष एव परमपुरुषार्थः सर्वेषां विद्याप्रस्थानानाम्। तस्य परमपुरुषार्थरूपमोक्षतत्साधनप्रमाणादिनिरूपणपरो ग्रन्थो दर्शनमिति आख्यायते।

न्यायवैशेषिकसांख्ययोगपूर्वोत्तरमीमांसा-भेदेन षट्-दर्शनानि प्रसिद्धानि सन्ति। सर्वाण्यपीमानि दर्शनानि सूत्ररूपाणि नैकैः महर्षिभिः प्रणीतानि। परमर्षिणा व्यासप्रणीतं वेदान्तदर्शनम् औपनिषद्दर्शन-मित्यपराभिधेयम् च। उपनिषदः अविद्यादिसंसारबीजविशरणशीलत्वाद् उपनिषच्छब्दस्य मुख्यवृत्या ब्रह्मविद्यैव अर्थ इति तत्र भाष्येषु वेदान्तप्रस्थाने संगिरन्ते ब्रह्मवादिनः। उप+नि पूर्वकस्य विशरणगत्यावसादनार्थकस्य षद्लृ धातोः क्विप्प्रत्ययान्तस्य इदं रूपमुपनिषदिति।

''**तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया**''।[१]

इति गीतावचनानुसारं गुरुमुपदेशं निशम्य ब्रह्मविद्यां निश्चयेन तन्निष्ठतया परिशीलयन्ति ये दृष्टानुश्राविकविषयवितृष्णास्सन्तः तेषामविद्यादेः संसारानर्थहेतुभूतस्य विशरणकर्त्री विनाशयत्री अवसादयत्री या सैव ब्रह्मविद्या। एतादृशब्रह्मविद्यामुपनिषच्छब्दवाच्यां तत्त्वेन अधिगमयितुं प्रवर्तमानं शास्त्रं वेदान्तशास्त्रम्। उपनिषदश्च निर्गुणं=ज्ञेयं, सगुणं=उपास्यञ्च ब्रह्म उपदिशन्ति। उपनिषदां सगुणनिर्गुणवाक्यानि सूत्रैः विचार्य निर्णयति भगवान् बादरायणः। उपास्यब्रह्मविचारपरमन्यत् शास्त्रं नास्ति, निर्गुणब्रह्मविचारकर्तुः अधिकारात् सगुणब्रह्मविचारकर्तुः अधिकारो भिन्नः, सगुणब्रह्मोपासनं कर्मसमुच्चितं भवति। तत्फलं च यथोपासनाब्रह्मलोकादिप्राप्तिः, एवं सति अधिकारिद्वयसाधारण्येन ब्रह्मविचाराङ्गभूतः अथ शब्दार्थो वर्णनीयः। अतः नेदं अद्वैतनिर्गुणब्रह्म-विचारप्रधानमिदं उपनिषच्छब्दवाच्यं वेदान्तशास्त्रमिति।

**वेदान्तदर्शनस्य वैशिष्ट्यम्—**

विदितमेवैतत् समेषां विदुषां परमतत्त्वप्रदर्शनाय प्रवृत्तं वेदान्तदर्शनम्। वेदान्ते अन्तोनिर्णयः परमपुरुषविषयः यत्रास्ति स वेदभागः वेदान्तशब्देन व्यवह्रियते। तदिदं दर्शनं पुरुषमधिगमयतीति। ''**तं त्वौपनिषदं पुरुषं पृच्छामि**''[२] इति श्रुतिरावेदयति। उपनिषदेकसमधिगम्यं परतत्त्वमिति ''**वेदान्तविज्ञानसुनिश्चितार्थाः**''[३], ''**शास्त्रयोनित्वात्**''[४] इत्यादिभिः प्रमाणवचनैः अवगच्छामः। ''**तद्विष्णोः परमं पदम्**''[५] इति श्रुत्यानुसारं मुमुक्षोः संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तद्विद्योपदेशरूपः मार्गः वेदान्तः प्रस्थानशब्देनाभिधीयते। तदुक्तं लोचने अभिनवगुप्तेन—''**प्रतिष्ठन्ते परम्परया व्यवहरन्ति येन मार्गेण तत्प्रस्थानम्**''[६] इति। तथा च उपनिषद्प्रस्थानं सूत्रप्रस्थानं, गीताप्रस्थानमिति प्रस्थानत्रयमपि मुमुक्षोरधिगन्तव्यं तत्त्वम् अवबोधयति। त्रिष्वपि उपनिषद्ब्रह्म-सूत्रगीताप्रस्थानेषु तत्त्वप्रतिपादनप्रकारभेद एव न तु तत्त्वभेदः। वेदान्तार्थनिर्णये उपनिषत्प्रस्थानं प्रमुखं स्थानं भजते, श्रुतिरूपत्वात्, अन्यद्द्वयं वेदमूलकं स्मृतिवत्। तन्मूलकत्वेनैव प्रमाणपदवीं भजत इति, तत्तत्प्रस्थानमधिरूढानां नातिरोहितमेतत्।

**सूत्रप्रस्थानम्—**

व्यासः, द्वैपायनः, कृष्णद्वैपायनः, बादरायणः, पाराशरि उपान्तरतमा इत्यादिनाम्ना प्रथितेन

बादरायणेन सूत्रप्रस्थानं प्रवर्तितम्। तत्प्रवर्तितदर्शन वेदान्तशास्त्रं, शारीरकमीमांसा, वाक्यशास्त्रं, ब्रह्ममीमांसा, वेदान्तवाक्यमीमांसा इत्यादिपदेन व्यपदिश्यते तत्र तत्र ग्रन्थेषु। भगवान् बादरायणविरचितब्रह्मसूत्रस्य श्रीकण्ठशंकररामानुजानन्दतीर्थप्रभृतयः नैके आचार्याः स्व स्व मतमुपस्थापनपुरःसरं भाष्यं व्यरचन्। तेषां साम्प्रतमतिप्रसिद्ध्या लब्धप्रचाराणि श्रीकण्ठीय-भगवत्पादीय-रामानुजीय-आनन्दतीर्थीयसंज्ञानि चत्वार्येव भाष्याणि बह्वीभिः व्याख्याभिः उपबृंहितानि सर्वतः प्रचरन्ति। तत्र श्रीकण्ठाचार्येण शैवविशिष्टाद्वैतप्रतिपादकं शैवभाष्यं (श्रीकण्ठभाष्यम्), भगवत्पादाचार्यशंकरैः अद्वैतप्रतिपादकं शांकरभाष्यम्, रामानुजाचार्यैः विशिष्टाद्वैतप्रतिपादकं श्रीभाष्यम्, आनन्दतीर्थैः द्वैतप्रतिपादकं पूर्णप्रज्ञभाष्यं विरचितम्। रामानुजैः यः सिद्धान्तः प्रवर्तितः सः विशिष्टाद्वैतसिद्धान्तत्वेन ख्यातिमलभत। विशिष्टाद्वैतपरम्परायामपि नैके आचार्याः अभूवन्, यैः अयं सिद्धान्तः प्रचारितः। श्रीकण्ठपरम्परायां आचार्य अप्पयदीक्षितः महता प्रयासेन श्रीकण्ठीयं शैवाद्वैतपरं व्याख्येयमिति विचिन्त्य चिन्नबोम्मभूपालप्रेरणया विरचितवान्।

**शैवसिद्धान्तस्यैतिह्यम् ( परिचयः )—**

भारतभूमौ भगवतः शिवस्योपासना वैदिककालादेव प्रचलिता वर्तते श्वेताश्वतरोपनिषदि शिवं सर्वाननशिरोग्रीवः, सर्वभूतगुहाशयः, सर्वव्यापी सर्वगतश्चोक्तः। भगवतः शंकराचार्येणापि ब्रह्मसूत्रशांकरभाष्ये माहेश्वरसम्प्रदायस्योल्लेखः कृतः। परवर्ती आचार्यैः अयं सम्प्रदायः भिन्नभिन्न नाम्ना संकेतितः। शैवदर्शनस्य प्रचारप्रसारक्षेत्रं दक्षिणभारतं तमिलप्रान्तमस्ति। शैवानुयायिनः शंकरस्य उपासनया शैवसिद्धान्तप्रतिपादकं स्तोत्रं तामिलभाषायां रचितवन्तः। तेषु चत्वारः प्रमुखाः आसन् सन्तअप्पारः, सन्तज्ञानसंबन्धः, सन्तसुन्दरः, सन्तमाणिक्कवाचकः इति। मेयकण्डादि अंतिमः चत्वारः संताचार्याः अभूवन्। यतोहि ये क्रमादेककस्य अपरः शिष्यः आसन्। एवं तामिलशैवैः स्वस्य स्वतन्त्रोपासनाविधानस्य निर्माणं कृतं, सैव तामिलशैवसिद्धांत उच्यते। एभिः चत्वारः सम्प्रदायः प्रवर्तितः। एतेभ्यः प्राक् सन्तनक्कीर, सन्तकण्णम्म तिरुमूलरादयः शैवसिद्धान्तप्रतिपादितानां तत्त्वानां विपुलं प्रचारं कृतवन्तः। तानि च तत्त्वानि शनैः शनैः संस्कृतभाषायां साहित्यरूपेण प्रतिष्ठितानि। तेषां मते भक्तकल्याणाय भगवतः शिवस्य मुखात् अष्टाविंशति(२८) तन्त्राणामविर्भावः जातः। एषु अष्टाविंशति(२८) तन्त्रेषु दश(१०) तन्त्रं द्वैतप्रतिपादकं वर्तते। तेषामेव शैवविशिष्टाद्वैत संज्ञेति। येषामुपदेशः परमशिवः प्रणवादिदक्षेभ्यः शिवेभ्यः कृतवान्।

सम्प्रति अयं माहेश्वरसम्प्रदायः चतुर्विधः प्राप्यते। पाशुपतः, शैवः, कालामुखः, कापालिकश्च। यद्यपि आचार्यशंकरः ब्रह्मसूत्रभाष्ये पाशुपत्-सम्प्रदायं वेदबाह्य उक्तवान्। ''**सा चेयं वेदबाह्येश्वरकल्पनानेक प्रकाराः**''[७]। परन्तु श्रीकण्ठाचार्येण वेदशिवागमौ समौ प्रामाणिकौ चोक्तौ। तत्रैव अप्पयदीक्षिताचार्यैः शिवार्कमणिदीपिकायां शिवागमः वैदिकावैदिकः द्विविधः प्रतिपादितः। वेदाधिकारिणां कृते वैदिकतन्त्रः, वेदानधिकारिणाञ्च कृते अवैदिक तन्त्रः। अतः उभावपि प्रामाणिकौ।

दार्शनिकविवेचन (तत्त्वमीमांसा-ज्ञानमीमांसा) दृष्ट्या माहेश्वर(शैव)-सम्प्रदायः त्रिविधः- द्वैतशिवतन्त्रः, द्वैताद्वैतरुद्रतन्त्रः, अद्वैतभैरवतन्त्रः। अस्य च शैव(तन्त्र)सिद्धान्तस्य क्षेत्रं तमिल

प्रान्तमासीत्। द्वैताद्वैत सिद्धान्तस्य क्षेत्रं गुर्जरप्रान्तमासीत्, अद्वैतभैरवतन्त्रं कश्मीरप्रान्ते अभवत्। 'सर्वदर्शनसंग्रहे माधवाचार्येण सूचितं' 'शैवसमूहः तमिलदेशस्य' 'शैवसिद्धान्तं सूचयति॥ शैवसिद्धान्तस्य प्रमुखः ग्रन्थः **'शिवसूत्रम्'**, अष्टमनवमशताब्द्यां विरचितम्। वासुगुप्तः **'स्पन्दकारिका'** नवम-शताब्द्यामलिखत्।

कालान्तरे शैवाचार्यैः शैवतन्त्रसिद्धान्तप्रतिपादनस्य श्लाघ्यः प्रयासः अभवत्। तेषु सद्योज्योतिहरदत्तशिवाचार्याश्च प्रमुखाः आसन्। हरदत्तशिवाचार्यः श्रुतिसूक्तमालायां वेदवेदान्तस्य तात्पर्यं शिवमाहात्म्यप्रतिपादने एव वर्तते इति प्रतिपादितवान्। आचार्य श्रीकण्ठः आचार्य अप्पयदीक्षितश्च अमुं ग्रन्थमेव स्वचिंतनस्य आधारं स्वीकृतवन्तौ। शैवसिद्धान्तानुसारेण सिद्धान्ततः शिव एव अद्वैतचेतनतत्त्वं वर्तते। प्रकृतिश्च जड़तत्त्वं वर्तते। शिवस्य मूलाधारः शक्तिरस्ति। अनयाशक्त्या एव बन्धमोक्षव्यवस्था सम्भवति॥

श्रीवादरायणप्रणीतब्रह्मसूत्राणामुपरि श्रीकण्ठाचार्यलिखितस्य भाष्यस्य सारावबोधार्थं श्रीमदप्पयदीक्षितेन शिवार्कमणिदीपिका लिखिता। तत्र आचार्यैः लिखितं—

**यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा। साकं सर्वैः पुराणैः स्मृतिनिकर-महाभारतादिप्रबन्धैः। तत्रैव ब्रह्मसूत्राण्यपि विमृशतां भांति विश्रान्तिमन्ति। प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्कराद्यैस्तदेव। तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः अद्वैतवासनां पुंसांमाविर्भवति नान्यथा॥**[८]

---

**सन्दर्भग्रन्थ—**


१. भगवद्गीता ४.३४
२. बृहदारण्यकोपनिषद् ५.१.२६
३. तैत्तरीयोपनिषद् १२.३
४. ब्रह्मसूत्रशांकरभाष्यम् १.१.३
५. कठोपनिषद् १.३.१०
६. ध्वन्यालोकलोचनम्
७. ब्रह्मसूत्रशांकरभाष्यम् २.२.३७
८. शिवार्कमणिदीपिका—भूमिका



शोधच्छात्रः,
—श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
कटवारिया सरायः, नव देहली-११००१६

# भाषाशास्त्रीयदृशा पदसंरचनाविवेचनम्

—अजीतकुमारः

संस्कृते पदानां वर्गीकरणं नैकाधाराधारितं वर्तते। अर्थावबोधदृष्ट्या साहित्यिकाः त्रिभेदात्मकं शब्दं मन्वते।[१] व्युत्पत्तेः प्रवृत्तिनिमित्ततायाश्च आधारेण शब्दस्य चत्वारो भेदाः स्वीकृताः।[२] वैयाकरणेष्वपि पदविभागविषये नैकमत्यं दृश्यते, तत्र एके द्विधापक्षम्, अपरे चतुर्धापक्षम्, इतरे पञ्चधापक्षं स्वीकुर्वन्ति। द्विधापक्षे तु केवलं नामाख्यातयोरेव ग्रहणम्। तत्र यैः पदैः द्रव्यस्य अर्थात् सत्त्वस्य प्रतीतिः भवति तानि नामपदानि, यैश्च भावस्य अर्थात् क्रियायाः प्रतीतिः परिलक्ष्यते तानि आख्याताह्वानि।[३] द्वितीयः पक्षः 'चतुर्धा पदानां स्थितिः' इति स्वीकरोति तानि च नामाख्यातोपसर्गनिपाताह्वानि सन्ति। प्रथमे मते उपसर्गनिपातयोरन्तर्भावः नामाख्यातयोः भवति, परमस्मिन् मते एतयोः सत्ता पृथगुररीकृता। यतो हि अर्थदृष्ट्या एते नामाख्याताभ्यां सर्वथा भिन्नम् अर्थं प्रत्याययतः, अर्थात् नामाख्याते वाचके उपसर्गनिपाते च द्योतके इति।[४] पदानां चतुर्धाविभागस्य परम्परा नितरां प्राचीना[५], स्वयं भाष्यकृताऽपि पदानि चतुर्भेदात्मकानि मतानि।[६] अयमेव पदविभागः सर्वसम्मतः। एतदतिरिक्तमन्यदपि मतमेकं यत् प्रोक्तभेदातिरिक्तं पञ्चमं कर्मप्रवचनीयं पृथङ्मनुते। एतदनुसारं कर्मप्रवचनीया उपसर्गवत् कस्या अपि क्रियायाः विशेषतां साक्षान्न द्योतयन्ति अपितु एते तु क्रियया सह कस्याश्चिद् कर्त्तृभिन्नसंज्ञायाः सर्वनाम्नो वा सम्बन्धं व्यञ्जयन्ति।[७] अत इमे उपसर्गेभ्यो भिन्ना। परन्तु पदं चतुर्धा एव विभक्तमिति मन्यमाना आचार्याः कर्मप्रवचनीयानाम् अन्तर्भाव उपसर्गेष्वेव इति मन्यन्ते।

**रूपरचनादृष्ट्या पदविभागः**—अत्र तु अस्माकं भाषाशास्त्रीयदृष्ट्या विहितः पदविभागः एव भाषाशास्त्रीयाध्ययनाय अभिप्रेतः। अनयैव दृष्ट्या संस्कृतपदानि द्विधा विभक्तानि आचार्यैः— १. सुबन्तानि, २. तिङन्तानि च। दर्भपवित्रपाणिराचार्य-पाणिनिरपि स्वीये भाषाशास्त्रीयविवेचने 'सुप्तिङन्तं पदमि'त्युक्त्वा द्विर्भेदात्मकं पदमिति स्वमतं प्रस्तौति।[८] शब्दान्तरयोस्तु नामपदं (सुबन्तस्य) आख्यातपदञ्च (तिङन्तस्य) पर्यायत्वेनावतिष्ठेते। आचार्यपाणिनिः उपसर्गान् एतदर्थं पदं न मनुते

---

१. शब्दोऽपि वाचकस्तद्वल्लक्षको व्यंजकस्तथा, सा०द० २/१९

२. चतुष्टयी शब्दानां प्रवृत्तिः। जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः॥ —महा०आ० २

३. भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि। —निरुक्त० १.१

४. नह्येतौ साक्षादर्थवदतः, अपितुतदगतिविशेषद्यौतकाविति वाचकाभ्यां नामाख्याताभ्यां प्रविभक्तौ। —हेलाराज, वाक्य० ३.१.१

५. तान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपातश्च। तानीमानि भवन्ति।—निरुक्त १.१.१

६. चत्वारि शृङ्गाः—चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। —महा० १.१.१

७. साक्षात् क्रियाविशेषप्रकाशनाभावात्तदपि पंचकम्। —हेला०, वाक्य० ३.१.१

८. सुप्तिङन्तं पदम्। —पा० १.४.१४

यतो हि रूपरचनादृष्ट्या एते न स्वतन्त्ररूपेण प्रयुज्यन्ते अपितु नामाख्यातैः सहैव प्रयुज्यन्ते। एवमेव निपाताः (अव्ययानि) अपि सुबन्तेषु गण्यन्ते, यद्यपि नैतेभ्यः सुपां संयोगो दृश्यते पुनरपि '**अपदं न प्रयुञ्जीत**' इति वैयाकरणराद्धान्तं निर्वोढुं पूर्वं तेभ्यः सुब्विधानं कृत्वा पश्चात्तल्लोपः क्रियते।[१]

**संस्कृत पदरचनायाः घटकतत्त्वानि—**

अर्वाचीन भाषावैज्ञानिकैदृष्ट्या संस्कृतपदरचना द्विधा विभक्तुं शक्यते।

१. सविकरणम् अर्थात् सविभक्तिकम् (Thematic)

२. अविकरणम् अर्थात् अविभक्तिकम् (Athematic)

रूपरचनादृष्ट्या सुबन्तस्य (नाम्नः) तिङन्तस्य (आख्यातस्य) च समावेशः सविभक्तिकपदेषु भवति। एतदर्थं पाणिनिराचार्यः सुपं तिङञ्चापि विभक्तिमाह।[२] अविभक्तिकपदेषु पुनः निपातसहितानां समेषामपि अव्ययानां समावेशः।

यद्यपि आधुनिक भाषाशास्त्रस्य पारिभाषिकशब्दावल्यां पदरचनायाः पृथक्-पृथगंशेभ्यः (Constituents) केवलं 'रूपिम' (Morpheme) इति पारिभाषिकशब्दस्य प्रयोगो दृश्यते, परन्तु संस्कृतवैयाकरणाः एतस्य कृते बहुधा भिन्नां शब्दावलीं प्रयुञ्जते। तद्यथा 'सुप्, तद्धित' इति रूपिम द्वयस्य संयोजनात् पूर्वं प्रयुज्यमाना मूलप्रकृतिः प्रातिपदिकम् (Stem) इति, 'तिङ् , कृत्' इत्येतयोः प्राक् प्रयुज्यमाना मूलप्रकृतिः धातुः (Root) इति पदेन व्यवह्रियते। एताभ्यां धातुप्रातिपदिकाभ्यां परं विधीयमानानि अर्थवन्ति तत्त्वानि प्रत्ययः (Suffixes) इति नामधेयानि। उपर्युक्तानि एतानि 'सुप्, तद्धितः, तिङ्, कृत्' इति संज्ञाभिः व्यवहृतानि भवन्ति।

पर्यवलोकनेनानेनं स्पष्टं भवति यत् संस्कृतपदरचनायां प्रत्येकस्मिन् व्युत्पन्नपदे तस्य प्रकृत्या सह प्रोक्तसुबादिप्रत्ययेषु कस्यचिदेकस्य तु स्थितिः स्यादेव। अर्थात् संस्कृतस्य प्रत्येकस्मिन् पदे प्रथमतत्त्वं तु प्रकृतिः (धातुः प्रातिपदिकं वा) पश्चात् प्रत्ययः (सुप् तद्धितः, तिङ्, कृत्) संभवति।

तद्यथा 'रामः' इति पदे 'राम' इति प्रकृतिः अर्थवत् प्रातिपदिकं, पुनः सु इति प्रत्ययः एकत्व-कर्तृत्वादिबोधकम् अर्थवत् तत्त्वम्। एवमेव 'रामौ' इत्यत्र 'औ' इति प्रत्ययः द्वित्वकर्तृत्वादिबोधकमर्थवत्तत्वमस्ति। 'पचति' इति पदे पच् प्रकृतिः (धातुः) 'अ' (शप्) इति विकरणं 'ति' इति प्रथमपुरुषत्व-एकत्व-क्रियात्वादिबोधकम् अर्थवत् तत्त्वं विद्यते।

संस्कृतवैयाकरणैः पदरचनाया एतेभ्यः मूलघटकतत्त्वेभ्यः अतिरिक्तं पदस्य भाषाशास्त्रीयव्युत्पत्तये आदेश-आगम-विकार-लोपादीनां कल्पनाऽपि विहिता। तथा च प्रकृत्या सह एतेषामनुबन्धानां संयोगवशाद् जायमानानि सन्ध्यात्मकतत्त्वानि (Prosodic features) गुण-वृद्धि-यण्-सम्प्रसारण-प्रकृतिभावादीनि अपि विवेचितानि।

अत्रेदमवधेयं यत् प्राचीनाः शाब्दिकाः धातुमूलानि (Roots) एव पदानि इति सिद्धान्तं

१. अव्ययादाप्सुपः। पा० २.८.८२

२. विभक्तिश्च। पा० १.४.१०४

मन्यन्ते। तदनुसारं प्रत्येकस्मिन् पदे प्रकृतित्वेन धातुरेव। परन्त्वाधुनिकाः भाषावैज्ञानिकाः एतादृशीं स्थितिं न मन्यन्ते।

संरचनात्मकदृष्ट्या नामपदानां रचनाप्रक्रिया द्विधा विभक्तुं शक्यते।

१. असमस्ता नामपदरचना, २. समस्ता नामपदरचना चेति।

उक्तमेव पूर्वं यत् नामपदस्य रचना द्वयोरर्थवत्तत्वयोः योगेन भवति तत्राद्यं प्रातिपदिकम् (प्रकृतिः, Stem) अपरम् सुप् (प्रत्ययः, Suffix) इति। प्रतिपदिकस्यापि भेदद्वयं कथितम्—

१. अव्युत्पन्नम्, २. व्युत्पन्नञ्चेति।

तत्र यास्काचार्यः अन्ये च केचन वैयाकरणाः सर्वाणि प्रातिपदिकानि धातुजानि एव इति मन्यन्ते।[१] परम् आचार्यपाणिनेः आचार्यपतञ्जलेश्च दृष्ट्या न सर्वाणि नामानि आख्यातजानि। एतदर्थं तैः व्युत्पन्ननाम्नाम् अव्युत्पन्ननाम्नाञ्च प्रातिपदिकसंज्ञा विधानाय सूत्रद्वयं प्रणीतम्।[२]

व्युत्पन्नप्रातिपदिकानामपि पुनः त्रयो भेदाः भवन्ति।

१. कृत्प्रत्ययान्तम्  २. तद्धितप्रत्ययान्तम्  ३. समस्तपदञ्चेति।

व्याकरणग्रन्थेषु नामपदानां व्युत्पत्तौ प्रयुज्यमानाः एते प्रत्ययाः वर्गद्वये संस्थापिताः तत्राद्यः कृत् (Primary) द्वितीयः तद्धितः (Secondary) इति पदेन अभिधीयते। अर्थात् धातुना सह मिलित्वा नामपदस्य रचयितारः प्रत्ययाः कृतः, यथा वच्+अस्=वचस्, एवञ्च कृत्प्रत्ययनिष्पन्नरूपैः अव्युत्पन्ननामरूपैश्च सह मिलित्वा नामपदानां रचयितारः प्रत्ययाः 'तद्धिताः' इति। यथा वाच्+इक=(वाचिक)

एवं समस्तपदमित्युक्ते यत्र द्वयोः द्वयाधिकानां वा पदानाम् एकपदत्वं भवति तद्यथा राज्ञः पुरुष 'राजपुरुषः' इति।

एवं समासतः भाषाशास्त्रीयदृशा पदसंरचनायाः कि स्वरूपमिति विवेचनस्य प्रयासो मया यथामति विहितः।

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥**

—शोधच्छात्रः
दिल्लीविश्वविद्यालयः,
दिल्ली

---

१. तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च, निरुक्त १.२.४५

२. (क) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। पा० १.२.४५

(ख) कृत्तद्धितसमासाश्च। पा० १.२.४५

# वैदिक सोम—एक विवेचन

—डॉ० धर्मेन्द्र कुमार

सोम ऐसा वैदिक शब्द है, जिसका ठीक अर्थ न समझने से वेद का अर्थ समझना कठिन है। वैदिक देवताओं में सोम एक प्रमुख देवता है। वेदार्थ को समझने में देवताओं का ज्ञान होना नितान्त आवश्यक है। सोम के वास्तविक स्वरूप को समझकर ही वेदमन्त्रों का तात्पर्यार्थ ठीक तरह से समझा जा सकता है। ऋग्वेद का नवम मण्डल सोम देवता का है। सामवेद के पावमान पर्व या काण्ड में कुल ११९ मन्त्र हैं और सभी का देवता पवमान सोम है। पवमान देवता होने से ही इसका नाम 'पावमान' रखा गया है। पवमान सोम पवित्रता, समस्वरता, शान्ति एवं आनन्द का प्रतीक है। केवल कल्पना कर लेने मात्र से सोम को सुरा मान लेने से वेदार्थ करना सम्भव नहीं है।

सोम शब्द का प्रचलित अर्थ सोम ओषधि अथवा चन्द्रमा है। 'सोम' शब्द निचोड़ने अर्थवाली षुञ्-अभिषवे धातु से निष्पन्न होता है। ओषधि को सोम इस कारण कहते हैं, क्योंकि इसे निचोड़कर उसका रस निकाला जाता है। ओषधिवाचक सोम शब्द प्रधान देवता रूप से वेदों में बहुत कम प्रयुक्त हुआ है। ऋग्वेद में यद्यपि सोम देवता वाली या पवमान सोम देवता वाली हजार से भी अधिक ऋचाएँ हैं, तथापि निरुक्तकार की दृष्टि से वे प्रायः सोम ओषधिपरक या चन्द्रमापरक नहीं है।

उणादिकोष में 'सु' धातु से अर्त्तिस्तु... मन्।[१] सूत्र द्वारा मन् प्रत्यय करके सोम शब्द सिद्ध किया गया है।

इस सूत्र में पठित सु धातु 'षू-प्रसवैश्वर्ययो:' भ्वादि तथा अदादि और षुञ् अभिषवे स्वादि, ग्रहण की जा सकती है। तदनुसार जो उत्पन्न करता है, जो ऐश्वर्य का हेतु होता है या जो निचोड़ा जाता है, वह सोम है। यद्यपि उणादि सूत्र में 'सु' धातु ही पठित है तो भी 'षू प्रेरणे' तुदादि तथा षूङ् प्राणिगर्भ विमोचने अदादि धातुओं से भी, मन प्रत्यय करके सोम शब्द की सिद्धि की जाती है।

इन धातुओं के आधार पर विभिन्न विद्वानों ने सोम शब्द के अनेक अर्थ प्रस्तुत किये हैं। महर्षि दयानन्द ने अपने वेदभाष्य में सोम शब्द के विभिन्न अर्थ दर्शाये हैं—

१. **सुवति चराचरं जगद् यः स जगदीश्वरः**—जो चराचर जगत् को उत्पन्न करता है वह जगदीश्वर

२. **सूयन्ते रसा यस्मात् स सोमौषधिराजः**[१]—जिससे रस निकाले जाते हैं, वह ओषधि राज सोम।

३. **सोमविद्यासम्पादको विद्वान्**[२]—सोमविद्या का सम्पादक विद्वान्।

४. **शुभकर्मगुणेषु प्रेरकः परमेश्वरो विद्वान् वा**[३]—शुभकर्मों एवं गुणों में प्रेरक परमेश्वर या विद्वान्।

५. **सकलैश्वर्यपठितः सौम्यगुणसम्पनः राजा**[४]—सकल ऐश्वर्यों से समृद्ध सौम्यगुणसम्पन्न राजा।

६. **बहुसुखप्रसावकः वायुः**[५]—बहुत सुख का उत्पादक वायु।

७. **चन्द्रः**[३]—चन्द्रमा

८. **सेनाप्रेरकः सेनाध्यक्षः**[६]—सेनाप्रेरक सेनाध्यक्ष।

९. **सौम्यगुणसम्पन्नः सभ्यो जनः**[७]—सौम्यगुण-सम्पन्न सभ्यजन।

उपर्युक्त विभिन्नार्थ स्वामी दयानन्द ने प्रकरणशः दर्शाये हैं।

सामवेद के पावमान काण्ड में पारमार्थिक दृष्टि से सोम शब्द का मुख्यार्थ परमात्मा है। सर्वोत्पादक परमात्मा ने ही ब्रह्माण्ड के सूर्य, चन्द्र, वायु, विद्युत् आदि और शरीर पिण्ड के प्राण, बुद्धि, वाक्, चक्षु, श्रोत्र आदि रचे हैं, क्योंकि उनकी रचना करना किसी मनुष्य के सामर्थ्य में नहीं है—

**सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।**[८]

परमात्मा के पास से धारा रूप में प्रवाहित होता हुआ ब्रह्मानन्द रस भी सोम कहलाता है। योगी श्री अरविंद की व्याख्यानुसार दिव्य आनन्द (Divine Beatitude) ही सोम है। परमात्मा के पास से अभिषुत ज्ञान और कर्म के रस की आनन्द रस की धारा से तृप्त हुआ वह आत्मा दुःख, विघ्न, विपत्ति आदि के सागर को पार कर लेता है—

**तरत् स मन्दी धावति धारा सुतस्यान्धस।**
**तरत् स मन्दी धावति॥**[९]

सोम का चन्द्र अर्थ के आलोक में—

**'यच्छुष्कम् तदाग्नेयम् यदार्द्रम् तत् सोम्यम्'**[१०]—जो शुष्क है, वह आग्नेय है और जो आर्द्र है, वह सोम्य है, इस वचन की संगति लग जाती है, क्योंकि चन्द्रमा की आर्द्रता शीतलता, रसवत्ता प्रत्यक्ष है।

अतः अधिदेव में यह सोम जलों का वह सूक्ष्मतम भाग है, जो सूर्य किरणों द्वारा सूर्य तक पहुँचता है या चन्द्रप्रभा द्वारा औषधियों में पहुँचता है—**अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।**[११]

सोम का अर्थ वेदवेत्ता, सत्यनिष्ठ नीरक्षीर विवेकी विद्वान् भी होता है—

**सोमोऽस्माकं ब्राह्मणानां राजा।**[१२]

**सोमं मन्यते पपिवान्........कश्चन।**[१३]

वस्तुतः उस सोम को वेदवेत्ता विद्वान् जानते हैं, उसे कोई (स्थूल बुद्धि) मनुष्य नहीं पा सकता।

अध्यात्म में सोम दिव्य आनन्द का प्रतीक है। श्री अरविन्द कहते हैं—सोमरस उस आनन्द की सत्ता के दिव्य आनन्द का प्रतिनिधि है जो ऋत या सत्य के बीच में से होकर अतिमानस चेतना से मन में प्रवाहित होता है।[१४]

वैदिक-साहित्य में सोम का ओषधियों के साथ विशेष सम्बन्ध बताया गया है। उदाहरण के लिए—

**१. सौम्या ओषधयः**[१५]

**२. सोम ओषधीनामधिराजः**[१६]

**३. सोमो वै राजौषधीनाम्**[१७]

**४. ओषधो हि सोमो राजा**[१८]

**५. या ओषधीः सोमराज्ञीः**[१९]

**६. ओषधयः संवदन्ते सोमेन सहराज्ञा**[२०]

वेद में देवों का भाग जल, औषधियों का रस घृत और सोम है—

**देवानां भाग उपनाह एष........शरीरम्।**[२१]

यजुर्वेद १९ तथा २० अध्यायों में सोम को शुक्र, रेतः और इन्द्रिय कहा है। आयुर्वेद में अग्नि और सोम शब्द का प्रयोग रजः तथा वीर्य के लिए हुआ है। यथा—**सौम्यं शुक्रमार्त्रवमाग्नेयम्।**

अर्थात् 'शुक्र' सोम है तथा ऋतुधर्म अग्नि है।

**शुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्तवेन।**

**ततोऽग्नि सोमसंयोगात् संसृज्यमानो गर्भाशयमनुप्रतिपद्यते क्षेत्रज्ञः।**[२२]

शुक्र वीर्य पुरुष से च्युत होकर योनि में आता है और ऋतुधर्म रजः के साथ मिलता है तब अग्नि और सोम के संयोग के साथ मिलकर जीवात्मा गर्भाशय को प्राप्त होता है।

ब्राह्मण ग्रन्थों में सोम शब्द का अर्थ वीर्य भी किया है। यथा—'रेतः सोमः'[२३] इस शक्ति का शरीर में क्या प्रभाव होता है, इसका दिग्दर्शन मन्त्र में प्राप्त होता है—

**सोमेनादित्या बलिनः सोमेन पृथिवी मही।**[२४] सोम की वीर्य शक्ति द्वारा आदित्य ब्रह्मचारी बलवान् होते हैं। वीर्य द्वारा स्त्री शक्ति भी पूजनीया होती है।

सोम का अर्थ न्यायाधीश है। ऋग्वेद और अथर्ववेद के सूक्तों में इन्द्र और सोम से राक्षसों अर्थात् प्रजापीड़क दुष्कर्मा लोगों को दण्डित करके प्रजाजनों की रक्षा की प्रार्थना है। सोम ही यह निश्चय करता है कि किस अपराधी को क्या दण्ड मिलना चाहिए। सोम से अपराध और दण्ड का निर्णय हो जाने के पश्चात् अपराधी सम्राट् (इन्द्र) के बन्धन में पड़ जाते हैं। मन्त्रों के वर्णन से स्पष्ट पता चलता है कि न्याय का (Judicial) काम सोम का है और शासक का काम इन्द्र का है। इन मन्त्रों में यह भावना दर्शायी गयी है—

**सुविज्ञानं चिकितुषे जनाय.....।**[२५]

**ये पाकशंसं विहरन्त।**[२६]

**न वा उ सोमो वृजिनं हिनोति।**[२७]

उपरोक्त सूक्त पच्चीस-पच्चीस मन्त्रों के लम्बे सूक्त हैं। इनके अध्ययन से यह ज्ञात होता है कि सत्यासत्यता का निर्णय करने का काम सोम को सौंपा गया है, तथा इन्द्र का काम केवल दण्ड प्रदान करना मात्र है।

वेदों में सोम शब्द का प्रयोग परमात्मापरक अर्थ में सबसे अधिक प्रयुक्त हुआ है। कुछ मन्त्र प्रस्तुत हैं—

**सोमः पवते जनिता मतीनां.....**[२८]

सोम पवित्र करता है, द्युलोक, पृथिवीलोक का उत्पन्न करने वाला है।

**पवित्रं ते विततं ब्रह्मणस्पते.....**[२९]।

**ते सोम ब्रह्म** अर्थात् वेद का स्वामी है।

**सोमयुत रुद्रं हुवेम**[३०] सोमम् शीलता और शान्ति के भण्डार सौम्यस्वरूप भगवान् को अपनी रक्षार्थ पुकारते हैं।

**सोम रारन्धि नो**[३१]...... हे सोम! अर्थात् हे सुख-शान्ति के स्रोत प्रभो!

**स्वादिष्ठया महिष्ठया पवस्व सोम धारया।**[३२]

यही वह स्वादिष्ट, आनन्दप्रद सोमधारा है, जिसे पीकर आत्मा तृप्त होता है।

मानव जीवन की सार्थकता सोमपान से ही सम्भव है—

**अपाम सोमम् अमृता अभूम....।**[३३]

हमने सोमपान कर लिया है, हम अमृतमय हो गए हैं। सोम के पान से तात्पर्य यहाँ ब्रह्मानन्द के सरस रस के पान से है और अमृतमय से तात्पर्य है, निर्विघ्न आनन्दमय पद। हमने ज्योति प्राप्त कर ली है, हमने दिव्यताएँ प्राप्त कर ली हैं।

जो परमात्मा के सोम रस का पान कर लेता है, वह अमरत्व को प्राप्त हो जाता है—

**इन्द्राय पवते मदः सोमो मरुत्वते सुतः।**[३४]

उपनिषदों में भी सोम की चर्चा की गई है—

वह परमात्मा सोम अर्थात् शान्ति स्वरूप और शान्तिदायक है, जगत् का स्रष्टा है। समाधि अवस्था में हृदय में उसी का मन्थन चिन्तन किया जाता है। **सोमो यत्रातिरिच्यते तत्र संजायते मनः।**[३५] पं० शिवशंकर ने आध्यात्मिक शैली में सोम का अर्थ जीव भी किया है—यद्यपि **सोम इति जलस्य संज्ञा तथापि तज्जल... संसर्गात् सैव संज्ञा जीवस्यापि भवति।**[३६]

मुण्डकोपनिषत् में सृष्टि के पदार्थों की उत्पत्ति बतलाते हुए सोम शब्द के द्वारा चन्द्रमा की उत्पत्ति का वर्णन किया गया है—

**सोमो यत्र पवते यत्र सूर्यः।**[३७]

संसार के दिव्य पदार्थ, जिस कारण रूप ऊर्जा शक्ति को प्राप्त करके अस्तित्ववान् रहते हैं, वही ऊर्जा शक्ति सोम है, जिसे बृहदारण्यक ने बीजतत्त्व कहा है—''**एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति।**''[३८]

बृहदारण्यक में शुक्लता गुण के आधार पर चन्द्रमा को सोमसंज्ञा से वर्णित किया है।[३९]

सृष्टि की उत्पत्ति के सम्बन्ध में सोम शब्द का प्रयोग कई स्थानों पर मिलता है। यह एक वैज्ञानिक तथ्य है कि प्रकाश और आर्द्रता में जीवाणुओं की उत्पत्ति होती है, बृहदारण्यक में इसी उत्पत्तिमूलक आर्द्रता को सोम कहा है।[४०] जैसे यज्ञ में डाली हुई आहुतियों से बादल बनते हैं। बादल से पुनः वर्षा होती है। इसी जलीय वाष्प को 'सोम' शब्द के द्वारा उल्लिखित किया है।[४१] इस प्रकार उपनिषत् साहित्य में भी सोम का स्वरूप प्रयोग होते हुए अनेक महत्त्वपूर्ण अर्थों की अभिव्यक्ति इसके द्वारा की गई है।

इस प्रकार हम देखते हैं कि वैदिक-साहित्य में सोम के विभिन्न अर्थ हैं। केवलमात्र

ओषधिवाचक, सोमलता नशीली होती थी। ऋग्वेद के अनेक मन्त्रों में मदिन्तमः मद्यः, मदच्युत, मधुमन्तमः, देवमादनः आदि विशेषण सोम के लिए प्रयुक्त हुए हैं। वेदभाष्यकार सायण ने सोम को मादक मानकर ही मन्त्रों की व्याख्या की है, इसलिए लोगों को सोम के प्रति यह भ्रान्ति हुई कि वह मदिरा की भाँति नशीला पदार्थ है। किन्तु शतपथ में इनका निराकरण करते हुए दोनों को पृथक् माना है। यहाँ शतपथ में सोम को सत्य श्री तथा ज्योतिस्वरूप कहा गया है, जबकि सुरा को 'अनृत पाप्मा' तथा तमःस्वरूपा बताया है।[४२]

ऋग्वेद के अनेक मन्त्रों में सोम के लिए ऐसे विशेषणों का प्रयोग हुआ है, जो पवित्रता के द्योतक हैं तथा शुचिजातः[४३], शुचिः[४४], पुनान[४५] आदि। वस्तुतः सोम को ओषधिवाचक यदि हम मानते हैं तो वह सोम सात्त्विक गुणोपेता एक वनस्पति थी, जिसका रस पीनेवाले को शक्ति स्फूर्त्ति, दीप्ति तथा प्रफुल्लता प्रदान करती है। सोम से विपरीत सुरा मनुष्यों की तामसी प्रवृत्तियों को जागृत करती है तथा उन्हें परस्पर लड़ाती है। यही बात ऋग्वेद में इस प्रकार कही गई है—**युध्यन्ते दुर्मदासो न सुरायाम्।**[४६]

तथापि यह स्वीकार करना होगा कि सोम का प्रयोग वैदिक-साहित्य में केवल किसी औषधियाँ की लता के अर्थ में ही नहीं हुआ है, अपितु विवेच्यमान लेख में जो विभिन्नार्थ आये हैं, उन विभिन्नार्थों की प्रकरणवशः संगति वैदिक-वाङ्मय में लगायी जानी चाहिए तभी हम वेदार्थ के साथ न्याय कर पायेंगे अन्यथा वह केवल हास्यास्पद बात बनकर रह जायेगी। इसलिए समग्रता में वैदिक-साहित्य आलोडन-विलोडन कर नवनीत को निकाला जा सकता है।

सारांश में वैदिक साहित्य में समागत सोम शब्द के विभिन्न अर्थों का प्रतिपादन कर लेख को समाप्त करते हैं।

**सोम के विभिन्न अर्थ—**

१— ओषधिः सोमः सुनोतेर्यदेनमभिषुण्वन्ति॥ नि० ११.२

२— सत्यं श्रीर्ज्योतिः सोमः॥ श० ५.१.२.१०

३— सोमो राजा चन्द्रमाः॥ श० १०.४.२.१

असौ वै सोमो राजा विचक्षणश्चन्द्रमाः॥ —कौषीतकि ब्रा० ४.४

तस्मात् सोमो राजा सर्वाणि नक्षत्राण्युपैति॥ —षड्विंश ब्रा० ३.१२

४— सोमो राजा राजपतिः॥ —तै० २.५.७.३

५— वृत्रो वै सोम आसीत्॥ —श० ३.४.३.१३

६— पितृलोकः सोमः॥ —कौ० १६.५। श० २.३.२.१२। तै० १.६.८.२

७— संवत्सरो वै सोमो राजा॥ —कौशीतकि ब्रा० ७.१०

८— सोमो वै पवमानः॥ —श० २.२.३.२२

एष वै सोमस्योद्गीथौ यत्पवते॥ —ताण्डय० ६.६.१८

९— सोमो वा इन्द्रः॥ —श० २.२.३.२३

१०— सोमो रात्रिः॥ —श० ३.४.४.१५

११— सोमो वै पर्णः॥ —श० ६.५.१.१

सोमो वै पलाशः॥ —कौ० २.२

१२— पशुर्वै प्रत्यक्षं सोमः॥ —श० ५.१.३.७

सोम एवैष प्रत्यक्षं यत्पशुः॥ —कौ० १२.६

पशवः सोमो राजा॥ —तै० १.४.७.६

१३— सोमो वै दधि॥ —तै० १.४.७६

१४— सोमः पयः॥ —श० १२.७.३.१३

१५— एष वै यजमानो यत् सोमः॥ —तै० १.३.३.५

१६— क्षत्रं सोमः॥ —ऐ० २.३८

१७— यशो वै सोमः॥ —श० ४.२.४.९

यशो वै सोमो राजा॥ —ऐ० १.१३

यशो वै सोमो राजान्नाद्यम्॥ —कौ० ६.६

१८— अन्नं सोमः॥ —कौ० ९.६

एतद्वै देवानां परमन्नाद्यं यत् सोमः॥ —कौ० १३.७

एतद्वै देवानां परमन्नं यत्सोमः॥ —तै० १.३.३.२

१९— प्राणः सोमः॥ —श० ७.३.१.२

२०— रेतः सोमः॥ —कौ० १३.७

सोमो वै वृष्णो अश्वस्य रेतः॥ —तै० ३.९.५५

२१— रसः सोमः॥ —श० ७.३.१.१

२२— आपः सोमः सुतः॥ श० ७.१.१.२२

२३— तद्यत्तदमृतं सोमः सः॥ —श० ९.५.१.८

२४— सोमो वै प्रजापतिः॥ —श० ५.१.३.७

२५— परोक्षमिव ह वा एष सोमो राजा यन्न्यग्रोधः॥ —ऐ० ७.३१

महर्षि दयानन्द ने ब्राह्मणादि ग्रन्थों, धात्वर्थों तथा अपनी प्रातिभा शक्ति के आधार पर प्रसंगानुसार सोम शब्द के विभिन्न अर्थ किए हैं। यथा—

१—ऐश्वर्य सम्बन्धी—

ऐश्वर्ययुक्त-यजु० २५.१६, २६.२५, ऋ० ३.५१.७, ४.२८.१।

ऐश्वर्यप्रापक-यजु० ६.२६, ६.३३, ८.२६, ८.५०, १९.५५,
ऋ० १.९१.१८, ३.३.१।

यौगैश्वर्ययुक्त ऋ० ९.१३३.४ (संस्कार विधि, संन्यास प्रकरण)।

ऐश्वर्यकारकं वेदशास्त्रबोधम्, ऋ० १.१०१.९।

योगसिद्धमैश्वर्यम्, यजु० ७.४, योगैश्वर्यवृन्दः, यजु० ७.९।

ऐश्वर्यगुणयुक्त गृहाश्रम, यजु० ८.४९।
धान्याद्यैश्वर्यस्य, यजु० २६.२३, ऋ० ४.३२.१७।
सुखैश्वर्यकारको न्यायः, ऋ० १.१३६.४।
विद्यैश्वर्ययुक्तः सत्कारी जनः, ऋ० १.४५.१०।
ऐश्वर्यमिच्छुः (न्यायाधीशः) यजु० ९.३१।
ऐश्वर्ययुक्ताय राज्याय वा, यजु० ४.२४।
ऐश्वर्योपपन्नाय (जनाय), यजु० १६.३९।
ऐश्वर्यवन्तः सभासदः, यजु० २१.४२, ऐश्वर्ययुक्त विद्वन्, यजु० २६.२५।
ऐश्वर्याः पदार्थाः, ऋ० ४.१४.४।
ऐश्वर्यप्रापके ब्रह्मणि, ऋ० १.८०.१।

२— जगदुत्पादक जगदीश्वर, सोमलतादि ओषधि यजु० ३.५६।
महौषधिरस ऐश्वर्यो वा ऋ० २.१४.३, ५.४३.५।

३— सोमविद्यासम्पादक यजु० ४.३७।

४— चन्द्र सम्बन्धी—
चन्द्र इव वर्तमानः यजु० १२.११२।
चन्द्रः ऋ० ३.६२.१४, चन्द्रलोकेन अथर्व, १४.१.२ (ऋग्वेदादिभाष्यभूमिका)।
चन्द्रमाः सोमलताद्योषधिगणः, अथर्व० १४.१.५४ (संस्कारविधि)।
चन्द्रेण प्रकाशमानेवाह्लादकत्वेन, यजु० १०.३०।

५— सर्वजगदुत्पादक, यजु० १.३८, ५.७, ७.२५।

६— सोमवल्ली सम्बन्धी—
सोमवल्लीव सर्वरोग विनाशक, यजु० ३४.२२, ऋ० १.१८७.९।
सर्वरोगनाशक महौषधिरसः, ऋ० ३.५३.६।
ओषधिविज्ञानाय, यजु० १०.५। ओषधिगणशोधनाय, यजु० २२.६।
सोमलताद्योषधिसमूहेन, यजु० १९.१।
सोमलतोद्भवेन (ओषधिरसेन), ऋ० ५.३४.२।
सोमवल्ली यजु० ८.१०, १०.५, १५.६०, १९.२१, १९.२५, २२.६, २४.९, २४.२९, २८.२६, ऋ० १.१०.४, १.२८.९, २.१४.३, ३.४०.५, ५.३४.२, ५.४३.५, ४७.१। अभिषोतुमर्हस्य (ओषधिरसस्य) यजु० १९.२१, २४.९, ३४.२।
सोमलतादिसमूहरसः, ऋ० १.१८.४। रसविशेषः, यजु० १९.२५।
वैद्यकशिल्पक्रियया संसाधित ओषधि रसः, ऋ० १.४७.१।

७— वीर्यवत्तम, ऋ० १.९१.१६।

८— सर्वविद्यायुक्त, ऋ० १.९१.२३।

